शारीरभाष्यपुस्तकंजनार्दनभट्टशालग्रामस्य ॥ १

श्रीगणेशायनमः॥सांख्यतार्किकबौद्धाश्चैजैनाःपाशुपतादयः॥यस्यतत्त्वंनजानंतितंवैदेरघुपुंगवं॥॥ब्रह्मणिसर्वधर्मोपपत्ति
वत्प्रधानेपितदुपपत्तिमाशंक्यनिराचष्टे॥रचनानुपपत्तेश्चनानुमानं॥ननुमुमुक्षुणांवाक्यार्थनिर्णयप्रतिबंधनिरासाय
वेदांतैस्तात्पर्यनिश्चेतुमिदंशास्त्रमारब्धंतच्चनिर्दोषतयानिश्चितं॥ततःपरपक्षनिरासात्मकोयंपादोस्मिन्शास्त्रेनसंगतः

श्रीगणेशायनमः॥रचनानुपपत्तेश्चनानुमानं॥यद्यपीदंवेदांतवाक्यानामेदंपर्यंतन्निरूपयितुंशास्त्रंप्रवृत्तंनतर्कशास्त्रव
त्केवलायुक्तिभिःकंचित्सिद्धांतंसाधयितुंदूषयितुंवाप्रवृत्तं॥तथापिवेदांतवाक्यानिव्याचक्षाणैःसम्यग्दर्शनप्रति
पक्षभूतानिसांख्यादिदर्शनानिनिराकरणीयानिइतितदर्थःपरपादःप्रवर्त्तते॥वेदांतनिर्णयस्यचसम्यग्दर्शनार्थत्वात्त
न्निर्णयेनस्वपक्षस्थापनंप्रथमंकृतं॥तद्ध्यहितंपरपक्षप्रत्याख्यानादिति॥ननुमुमुक्षूणांमोक्षसाधनेनसम्यग्दर्शननिरूपणायस्वपक्षस्थापनमेवकेवलंकर्त्तुंयुक्तं॥किंपरपक्षनिराकरणेनपरद्वेषकरणेन

तन्निरासस्यमुमुक्षुनपेक्षितत्वादित्याक्षिपति॥यद्यपीति॥परपक्षनिराकरणंविनास्वपक्षस्थैर्ययोगात्तत्कर्त्तव्य
मित्याह॥तथापीति॥तर्हिस्वपक्षस्थापनात्प्रागेवपरपक्षप्रत्याख्यानंकार्यमित्यतआह॥वेदांतार्थेति॥वेदांततात्पर्यनि
र्णयस्यफलवत्त्वात्तत्करणंतभ्यादभ्यर्हितत्वं॥ननुरागद्वेषकरत्वात्परमतनिराकरणंनकार्यमितिशंकते॥नन्विति॥

तत्तन्निर्णयप्रधानत्वेयंकथंरचनातत्तन्निर्णयश्चपरमतेश्रद्धांविनानसिध्यतिसाचतेषुभ्रांतिमूलत्वान्निश्चयंवि
नानसिध्यति॥सचस्वमतंपादंविनानेतिस्वसिद्धांतसंरक्षणार्थत्वात्प्रधानसिध्यर्थत्वादयंपादोऽस्मिन्शास्त्रेसंगतःसंगतत्व
द्वितरागेणापिकर्त्तव्यस्यक्षिप्तसंधायोक्तांगीकारेणसमाधत्ते॥बाढमित्यादिना॥अपदेशेनव्याजेनमंदमतीनांतेषुश्रद्धानिमित्ता
बाढमेवं॥तथापिमहाजनपरिगृहीतानिमहांतिसांख्यादितंत्राणिसम्यक्दर्शनापदेशेनप्रवृत्तान्युपलभ्य
भवेत्॥केषांचिन्मंदमतीनांएतान्यपिसम्यग्दर्शनायोपादेयानीयपेक्षा॥तथायुक्तिगाढत्वसंभवेनसर्वज्ञभा
षितत्वाच्चश्रद्धास्पदेषियतस्तदसारतोपपादनायप्रयस्यते॥नन्वीक्षतेर्नाशब्दकर्मात्वान्नानुमानापेक्षा॥एते
नसर्वेव्याख्याताव्याख्यातृत्वेचपूर्वत्रापिसांख्यादिपक्षप्रतिक्षेपःकृतः॥किंपुनःकृतकरणेनेति॥

निबर्हणसंतीतितन्निरासायप्रयत्नःक्रियतेइत्यर्थः॥स्वमतश्रद्धापरमतदूषणोत्प्रधानसिद्ध्यर्थत्वादंगी
कृतेनाप्ययंदोषः॥परपक्षहबुध्याहिनिरासोदूषणभावहेति॥ननुतत्तन्निर्णयेच्छयाकृतइतिमंत्रंपौन
रुक्त्यंशंकते॥नन्वीक्षतेरितिः॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

एवं सांख्यादीनां श्रुत्यर्थानुग्राहकतर्कनिरासादश्रौतत्वमुक्तं ॥ संप्रति श्रुत्यनपेक्षास्तदीयाः स्वतंत्रायुक्तयो निरस्यंतद्दर्शयन्
भेदान्नपुनरुक्तिरित्याह ॥ तदुच्यतइति । प्रधानमचेतनंजगदुपादानमितिसांख्यसिद्धांतोत्र विषयः । सकिंप्रमाणमूलोभ्रां
तिमूलोवेतिसंदेहेसर्वधर्मोपपत्तेश्चेयुक्तधर्माणांप्रधानेसंभवात्तदेवोपादानमितिक्षेपसंगत्याप्रमाणमूलत्वंदर्शयन्
पूर्वपक्षमाह ॥ तत्रसांख्याइति ॥ स्वसिद्धांतज्ञानस्यपरमतनिरासंप्रयुपजीव्यहात्पादयोः संगतिः । परमतनिरासात्मक
तदुच्यते ॥ सांख्यादयः स्वपक्षस्थार्थयवेदांतवाक्यान्यपिदार्ढ्यस्वपक्षानुगुण्येनैवयोजयंतोव्याचक्षते ॥
तेषांयद्व्याख्यानंतद्व्याख्यानाभासंनसम्यग्व्याख्यानमितिसेतावत्पर्वसूत्रं ॥ ऋतुवाक्यनिरपेक्षःस्वतं
त्रस्तुयुक्तिप्रतिषेधःक्रियतइत्येषविशेषः ॥ तत्रसांख्यामन्यंते ॥ यथाघटशरावादयोभेदाःमृदात्मनाऽ
न्वीयमानाःमृदात्मकसामान्यपूर्वकालोकेदृष्टाः ॥

तात्सर्वेषामधिकरणानामेतत्पादसंगतिः ॥ पूर्वपक्षेप्रमाणमूलमलविरोधादुक्तश्रुत्यर्थसमन्वयासिद्धिःफलं
सिद्धंतेतत्सिद्धिरितिआपादंद्रष्टव्यं ॥ श्रौतसमन्वयदार्ढ्यार्थत्वादस्यपादस्यश्रुतिसंगतिरिति विवेकः ॥ भिद्यं
तइतिभेदाः विकाराःयेविकारायेनाभिताःतेतत्राऽऽतिकाइतियास्यिमाह ॥ यथेति ॥ ॥ ॥ ॥ ॥

सर्वकार्यसुखदुःखमोहात्मकवस्तुत्रयात्मिकंतदन्वितत्वात् घटवदित्यनुमानमानमाह ॥ तथेति ॥ किमर्थंप्रधानंपरिणमतेत्याह ॥
चेतनस्येति ॥ अर्थोभोगापवर्गरूपःतदर्थंस्वभावतएवप्रवर्त्तते ॥ ननुकेनचिच्चेतनेनप्रेर्यतेइत्यर्थः ॥ तदुक्तं पुरुषार्थएवहेतुर्न
केनचित्कार्यतेकारणमिति ॥ अनुमानांतराणितेरुक्ता निस्मारयति ॥ तथेति ॥ उक्तंहि भेदानांपरिमाणात्समन्वयात्शक्तितः
प्रवृत्तेश्च ॥ कार्यकारणविभागादविभागाद्वैश्वरूप्यस्येति ॥ अत्रकारिकायांसमन्वयादितिलिंगंव्याख्यातं ॥ शक्तिरपिव्याख्यायते ॥ तथा
हि ॥ क्षित्यादीनांभेदानांकारणंअव्यक्तमस्तिपरिमितत्वात् घटवत् ॥ नचदृष्टेनसाध्यवैकल्यं घटोत्पत्तेः प्रागपिव्यक्तघटादि न

तथासर्वैएवाध्यात्मिकाभेदाःसुखदुःखमोहात्मतयाऽन्वीयमानाःसुखदुःखमोहात्मकसामान्यपूर्वका
भवितुमर्हंति ॥ यत्तत्सुखदुःखमोहात्मकंसामान्यंतत् त्रिगुणंप्रधानंमद्वदचेतनं ॥ चेतनस्यपुरुषार्थं
साधयितुंस्वभावेनैवचित्रेणविकारात्मनाविवर्त्ततइति ॥ तथापरिमाणादिभिरपिलिंगैस्तदेवप्रधा
नमनुमिमते ॥ तत्रवदामः ॥

रूपकार्यविशिष्टेनमहदादिव्यक्तात् तथाघटादीनांकारणशक्तितःप्रवृत्तेर्महदादिकार्याणामपिकारणशक्तितः प्रव
र्त्तिर्वाच्या तच्चशक्तिमत्कारणमव्यक्तं ॥ किंचकारणात्कार्यस्यविभागोजन्मदृश्यते ॥ क्षितेर्मृत्तिकाजायेत ततोघटइति ॥ एव
मविभागः प्रतितोम्येनप्रत्ययोदृश्यते ॥ घटस्यमृत्तिकायांत्रयः तस्याःक्षितौक्षितेरप्सुअपांतेजसीत्येतौविभागावि
भागोवैश्वरूप्यस्यविचित्रस्यभास्वतोनस्यदृश्यमानोऽथकूपक्षीरतोदधिनवनीतेविभागतादविभागतान्म
रिघटविभागाविभागवदित्यर्थः ॥ सिद्धांतइति ॥ तत्रवदामइति ॥

क्रममनुमानेःअचेतनप्रकृतिरूपंजगतःसाध्यते॥स्वतंत्राचेतनप्रकृतिकर्तृका॥आद्येसिद्धसाधनताआस्माभिरनादित्रिगुणा
योगीकारात्॥द्वितीयेघटादिदृष्टांतेसाध्याप्रसिद्धिरित्याह॥यदीति॥स्वतंत्रमचेतनंप्रकृतिरित्येतद्दृष्टांतबलेनतदानि
त्येतद्यदिदृष्टांतःक्वचित्स्यात्ननुदृष्टःक्वचिदित्यन्वयः॥स्वतंत्रपदार्थमाह॥चेतनानधिष्ठितमिति॥परकीयस्यसाध्या
प्रसिद्धिमुक्त्वासत्प्रतिपक्षंवक्तुंयद्विचित्ररचनात्मकंकार्यंतच्चेतनाधिष्ठितानचेतनप्रकृतिकमितिव्याप्तिमाह॥गेहे

यदिदृष्टांतबलेनैवैतन्निरूप्येतनाचेतनंलोकेचेतनानधिष्ठितंस्वतंत्रंकिंचिद्विशिष्टपुरुषार्थनिर्व
र्तनसामर्थ्यान्निकारान्विरचयद्दृष्टं॥गेहप्रासादशयनासनविहारभूम्यादयोहिलोकेप्रज्ञाव
द्भिःशिल्पिभिर्यथाकालंसुखदुःखप्राप्तिपरिहारयोग्याराचिताद्दृश्यंते॥तथेदंजगदखिलंपृथि
व्यादिनानाकर्मफलोपभोगयोग्यंबाह्यमाध्यात्मिकंशरीरादिनानाजायुञ्चितंप्रतिनियतावयवि
न्यासमनेकविधकर्मफलानुभवाधिष्ठानंदृश्यमानंप्रज्ञावद्भिःसंभावितंतमैःशिल्पिभिर्मनसापिआलो
चयितुमशक्यंसत्कथमचेतनंप्रधानंरचयेत्॥

ति॥इदंजगच्चेतनाधिष्ठितंचेतनप्रकृतिकं॥कार्यत्वात्॥गेहवदिति प्रयोगः॥विपक्षेविचित्ररचनानुपपत्तिरू
पंसत्प्रतिपक्षंवक्तुंजगतोवैचित्र्यमाह॥तथेति॥बाह्यंपृथिव्यादिभोग्यंआध्यात्मिकंशरीरादिचभोगा
धिष्ठानमितिविभागःप्रतिनियतोसाधारणोऽवयवानांविन्यासोरचनायस्यतदित्यर्थः॥इदंविचित्रंजगच्चेतनान
धिष्ठताजडप्रकृतिःकथंरचयेन्नकथमपीत्यर्थः॥

॥२॥

यच्चेतनानधिष्ठितमचेतनंतन्नकार्यकारीतिव्याप्तिमुक्ततर्कमूलभूतामाह॥लोष्ठेति॥चेतनाऽप्रेरितेषुलोष्ठ
दिषुकार्यंकारितादर्शनादित्यर्थः॥किंचानादिजडप्रकृतिश्चेतनाधिष्ठितापरिणामितान्मृदादिवदित्याह॥मृदिति॥
ननुमृदादिदृष्टांतेद्वयमप्यस्तिअचेतनत्वंचेतनाधिष्ठितत्वंचेतितत्रपरिणामित्वहेतोश्चेतनत्वमेवव्यापकंमृदादि

लोष्ठपाषाणादिष्वदृष्टत्वात्मृदादिष्वपिकुंभकारादिद्याधिष्ठितेषुविशिष्टाकाररचनादृश्यते॥नद्वयधा
नस्यापिचेतनांतराधिष्ठितत्वप्रसंगः॥नचमृदाद्युपादानस्वरूपव्यपाश्रयेणैवधर्मेणमूलकारणम
वधारणीयंनबाह्यकुंभकारादिव्यपाश्रयेणेतिकिंचिन्नियामकमस्ति॥

स्वरूपेतेनांतरंगत्वात् ननुचेतनाधिष्ठितत्वंव्यापकंतस्यमृदादिबाह्यकुलालादिसापेक्षत्वेनबहिरंत
रंगत्वात्तथाचपरिणामितेर्मूलप्रकृतेरचेतनत्वधर्मेणैवयोगोनचेतनाधिष्ठितत्वेनेत्याशंक्यनिषेधति
नचेतिमहानसदृष्टांतेऽन्तरंगस्यापिमहानसस्वरूपस्यधूमव्यापकत्वंनास्तितद्धिन्नस्यबहिरंगस्यापिवन्हे
स्तदस्तीयंतरंगत्वव्यापकत्वेप्रयोजकंनभवतीतिभावः॥

पि

किंचयदचेतनंतच्चेतनाधिष्ठितमेवपरिणमतेइत्यंगीकारेबाधकाभावात्प्रयुतश्रुत्यनुग्रहाच्चतथांगीकार्यमित्याह॥ नचैवंसतीति सुखदुःखमोहान्वयादितिहेतोरसिद्धिद्योतनार्थःसूत्रेचकारदृश्यते॥अन्वयाद्यनुपपत्तेश्चेति नानुमानयुक्तमित्यर्थः आदिशब्दःपरिमाणादिग्रहार्थः॥ शब्दादीनांबाह्यत्व

नचैवंसतिकिंचिद्विरुध्यतेंप्रत्युतश्रुतिरनुगृह्यते॥ चेतनकारणसमवर्णादितोरचनानुपपत्तेश्चहेतोःनाचेतनंजगत्कारणंमनुमानव्यंभवति अन्वयाद्यनुपपत्तेश्चेतिचशब्दो हि नहेतोरसिद्धिंसमुच्चिनोति नबाह्याध्यात्मिकानांभेदानांसुखदुःखमोहात्मकतयाऽन्वयउपपद्यते सुखादीनांचांतरत्वप्रतीतेःशब्दादीनांचांतदूपत्वप्रतीतेः तन्निमित्तत्वप्रतीतेश्च॥

नुभवादांतरसुखाद्यात्मकत्वमसिद्धंतन्निमित्तत्वाच्च॥नहिनिमित्तनैमित्तिकयोरभेदेनयोगोस्तिदंडघटयोरदर्शनादित्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥४॥

किंच॥यदिघटमृत्सुखादिवंशब्दादिचेतंस्यात्तर्हिसर्वैरविशेषेणसुखादिकमुपलभ्येतघटमृद्वत्तथोपलब्धिरस्तीत्यायानुलब्धेस्तत्भावनिश्चयइत्याह॥शब्दादीति॥विषयस्यैकत्वेपिपुरुषवासनावैचित्र्यात्तस्यचित्सुखबुद्धिःकस्यचित्दुःखबुद्धिःकस्यचिन्मोहबुद्धिर्दृश्यते॥अतोविषयाःसुखाद्यात्मकानभवंतीत्यर्थः॥एवंसन्नयादितिहेतुंदूषयति॥

शब्दादिविशेषेपिचभावनाविशेत्सुखादिविशेषोपलब्धेः नथापरिमितानांभेदानांमुखादीनांसंसर्गपूर्वकत्वंदृष्ट्वाबाह्याध्यात्मिकानांभेदानांपरिमितत्वात्संसर्गपूर्वकत्वमनुमिमानस्यसत्वरजस्तमसामपिसंसर्गपूर्वकत्वप्रसंगःपरिमितत्वाविशेषात्॥

परिमाणादिहेतून्दूषयति॥तथेति॥बुध्यादीनांपरिमितत्वेनसंसर्गपूर्वकत्वसिद्धौसंस्पृष्टान्यनेकानिसत्वरजस्तमांसिसिध्यंति॥एकस्मिन्संसर्गासंभवात्नत्रयसिद्धिरितिसाम्यस्याभावःकिमिदंपरिमितत्वंतावद्दृशतःपरिच्छेदःपक्षांतर्गताकाशेतस्याभावेनभोगासिद्धेः॥नापिकालतःपरिच्छेदःसाम्येःकालस्यानंगीकारात्॥अविद्यागुणसंसर्गेणासिद्धसाधनाच्चनापिवस्तुतःपरिच्छेदःसत्वादीनांपरस्परंभिन्नत्वेसत्यपिसाध्याभावेनव्यभिचारादित्याह॥ सत्वेति॥

यदुक्तं कार्यकारणविभागोयत्रसमाप्यतेतत्प्रधानमितितन्नब्रह्मणिमायायांनासमाप्तिसंभवात्॥नचयः कार्यस्यविभागःसचेतनानधिष्ठिताचेतनेसमाप्यतइतिव्याप्तिरस्ति॥सर्वत्राचेतनेषुचेतनाधिष्ठानदर्शनादिसाह॥कार्येति॥एतेनाविभागोपिव्याख्यातः॥यत्तुयत्परिमितंतदवश्यंप्रवृत्तिपूर्वकमितिव्याप्त्यंतरंतस्यापिगुणेष्वनादिषुपरिमितेषुव्यभिचारः॥एतेनसदृशयोरेवप्रकृतिविकारभावादचेतनमेवप्रकृतिरितिनिरस्तं॥चेतनाधिष्ठिताचेतनप्रवृत्तिकेपि

कार्यकारणभावस्तुप्रेक्षापूर्वकनिर्मितानांशयनादीनांदृष्टइतिनकार्यकारणभावान्नाद्याध्यात्मिकानांभेदानामचेतनपूर्वकत्वंशक्यंकल्पयितुं॥ प्रवृत्तेश्च॥ आस्तांतावदियंरचनातत्सिध्यर्थायाप्रवृत्तिःसाम्यावस्थानात्प्रच्युतिःसत्वरजस्तमसांअंगांगीभावरूपापत्तिर्विशिष्टकार्याभिमुखप्रवृत्तिता

सादृश्योपपत्तेः॥नविलक्षणत्वादियंरचनासादृश्यनियमस्यनिरस्तत्वाच्च॥एवंचेतनाधीनकारणशक्तितःकार्यप्रवृत्तिसंभवात्॥शक्तितःप्रवृत्तिलिंगमन्यथासिद्धमितिभावः॥स्वतंत्रमचेतनंकारणत्वेननानुमातव्यं॥तस्यस्वार्थेपरार्थेप्रवृत्तेरनुपपत्तेरितिचकारणानुपपत्तिपदमनुषज्यसूत्रंयोजनीयं॥रचनाप्रवृत्त्योःकोभेदइत्यांकांप्रवृत्तिस्वरूपमाह॥साम्येति॥एषांनांविलसाम्यावस्थातलानांप्रलयःतदानकिंचित्कार्यंभवतिप्रलयाभावेप्रसंगात्किंतादृसाम्यच्युतिरूपंवैषम्यंभवति॥ततःकस्यचिद्गुणस्यांगित्वमुद्भूतत्वेनप्राधान्यंकस्यचिदंगत्वंशेषत्वमितिसंगांगिभावोभवतितत्तस्मिन्सतिमहदादिकार्योत्पादनाभिमुखाप्रवृत्तिस्तयाविविधकार्यविन्यासोरचनेतिभेदइत्यर्थः॥ ॥५॥

गुणानांप्रवृत्तिःचेतनाधिष्ठानपूर्विकाप्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्याह॥सापीति॥विपक्षेस्वतंत्रेप्रवृत्यनुपपत्तिरित्यर्थः॥केचित्तुभेदानांप्रवृत्तिंशक्तिमताचेतनानधिष्ठिताचेतनप्रवृत्तिंप्रतिहेतुमितिशक्तितःप्रवृत्तिरितिलिंगंव्याचक्षते॥अस्यापिगुणेष्वव्यभिचारः॥कार्यंतुविशेषणेचविवक्षितं॥प्रवृत्तिंशक्तेरितिकार्यंतस्यघटादिषुचेतनाधिष्ठितप्रवृत्तिकत्वेनोक्तसाध्यविरुद्धेनव्याप्तिदर्शनादितिप्रवृत्तेश्चेतिसूत्रेणोक्तापत्तौ॥ननुलोकेस्वतंत्राचेतनानांप्रवृत्तिदर्शनात्किंप्रधानेसाप्रवृत्तिःसिध्यतुत्राह॥दृष्टाचेति॥अनुमानेशरणस्यतत्रदृष्टांतंविनाऽसंभवादित्यर्थः॥सिध्ययोगसापिनाचेतनस्यप्रधानस्यस्वतंत्रस्योपपद्यते॥मृदादिष्वदर्शनात्तुरथादिषुच॥नहिमृदादयोवा

स्वयमचेतनाःसंतःचेतनैःकुलालादिभिरश्वादिभिर्वानधिष्ठिताविशिष्टकार्याभिमुखप्रवृत्तयोदृश्यंते॥दृष्टाच्चादृष्टसिद्धिः॥अतःप्रवृत्यनुपपत्तेरपिहेतोर्नाचेतनंजगत्कारणमनुमातव्यंभवति॥ननुचेतनस्यापिप्रवृत्तिःकेवलस्यैवनदृष्टा॥सममेतत्॥तथापिचेतनसंयुक्तस्यरथादेरचेतनस्यप्रवृत्तिर्दृष्टा॥नतुचेतनसंयुक्तस्यचेतनस्यप्रवृत्तिर्दृष्टा॥ ॥

दितिभावः॥ननुप्रधानस्यप्रवृत्तिंखंडयताचेतनस्यसृष्टेप्रवृत्तिर्वाचासानयुक्तेतिसांख्यःशंकते॥नन्विति॥शुद्धचेतनस्यप्रवृत्ययोगमंगीकरोति॥सत्यमितितर्हिकेवलस्याचेतनस्यप्रवृत्तिसिद्धिरन्यथासृष्ट्ययोगात्तत्राह॥तथापीति॥केवलस्याचेतनस्यप्रवृत्तावपिचेतनाचेतनयोर्मिथःसंबंधात्सृष्टिप्रवृत्तिरितिभावः॥इमंवेदांतसिद्धांतंसांख्योदूषयति॥नत्विति॥सर्वाप्रवृत्तिरचेतनाभ्रमेयेनदृष्टा॥नतुचेतनसंबंधेनापिचेतनस्यक्वचित्प्रवृत्तिर्दृष्टा॥तस्मा

मतद्वयं श्रुतामध्यस्थः पृच्छति॥ किंपुनरिति॥ यस्मिन्नचेतनेरथादौ प्रवृत्तिर्दृष्टा तस्यैवसानचेतनस्तत्रेहेतुरितिकिं सांख्यमतंसाधुउतयेनचेतनाश्वादिनासंयोगादचेतनस्यप्रवृत्तिस्तत्प्रयुक्तासेतिवेदांतिमतंनासाध्वितिप्रश्नार्थः॥ सांख्यआह॥ नचेति॥ उभयोःप्रवृत्तिदाश्रयोरित्यर्थः॥ दृष्टाश्रयेणैनप्रवृत्तेरुपपत्तावदृष्टचेतनप्रयुक्तेर्नकल्पेतिभावः॥ आत्मनोऽप्रत्यक्षतेःकथंसिद्धिस्तत्राह॥ प्रवृत्तीति॥ जीवद्देहस्यरथादिपूर्वोवैलक्षण्यंप्राणादिमत्त्वंलिंगंदृष्टमितिरूपा चेतनस्यसिद्धिरित्यन्वयः॥ जीवद्देहःसात्मकःप्राणादिमत्त्वात्॥ व्यतिरेकेणरथादिवदित्यात्मसिद्धिरित्यर्थः॥ देहप्रवृत्तिः

किंपुनरत्रयुक्तं॥ यस्मिन्प्रवृत्तिर्दृष्टातस्यसाउतयत्संयुक्तस्यदृष्टातस्येसेति॥ ननुयस्मिन्दृश्यतेप्रवृत्तिस्तस्यैवसेतिक्रममुभयोःप्रत्यक्षत्वात्॥ नतुप्रवृत्तेराश्रयतेनकेवलश्चेतनोरथादिवत्प्रत्यक्षःप्रवृत्याश्रयदेहादिसंयुक्तस्यैवतुचेतनस्यसद्भावसिद्धिः॥ केवलाचेतनारथादिवेनाभावः लक्षणंजीवद्देहस्यदृष्टमिति॥ अतएवचप्रत्यक्षेदेहेसतिदर्शनात्॥ असतिचादर्शनाद्देहस्यैवचैतन्यमपीतिलोकायतिकाःप्रतिपन्नाः॥ तस्मादचेतनस्यैवप्रवृत्तिरिति॥॥

तत्राश्रयादन्येनज्ञानवतासहभूतप्रवृत्तित्वाद्रथादिवृत्तिवदनुमानांतरसूचनायप्रवृत्याश्रयेत्युक्तं॥ सद्भावज्ञानसिद्धिरेवनप्रवर्तकतामियेवकारार्थः॥ अनुमितस्यसद्भावमात्रेणप्रवृत्तिहेतुत्वेसर्वत्राकाशस्यहेतुत्वप्रसंगादितिभावः॥ आत्मनोऽप्रत्यक्षत्वेचार्वाकाणांभ्रमोपिलिंगमित्याह॥ अतएवेति॥ अप्रत्यक्षतादेवेत्यर्थः॥ देहान्नात्मनःप्रत्यक्षतेर्भ्रमासंभवादितिभावः॥ दर्शनान्नवृत्तिचैतन्ययोरितिशेषः॥॥

॥६॥

प्रवृत्तिंप्रत्याश्रयत्वमचेतनस्यैवयुक्तमंगीकृत्यचेतनस्यप्रयोजकत्वंसिद्धांतीसाधयति॥ तदभिधीयतइति॥ रथादिप्रवृत्तावश्वादिचेतनस्यान्वयव्यतिरेकौस्फुटीताभ्यांचेतनस्यप्रवर्तकत्वंबाह्यानामपिसंमतमित्याह॥ लोकायतिका

तदभिधीयते॥ नब्रूमोयस्मिन्नचेतनेप्रवृत्तिर्दृश्यतेनतस्येतिभवतुतस्यैवसा॥ सातुचेतनादुद्भवतीतिब्रूमः॥ तद्भावेभावात्॥ तदभावेचाभावात्॥ यथाकाष्ठादिव्यतिरेकाश्रयापिदात्प्रकाशात्प्रकाशक्षणाविक्रियानुपलभ्यमानापिचकेनेज्वलनेज्वलनादेवभवति॥ तत्संयोगेदर्शनात्तद्वियोगेचादर्शनात्॥ तद्वत्॥ लोकायतिकानामपिचेतनएवदेहोऽचेतनानांरथादीनांप्रवर्तकोदृष्टइतिविप्रतिषिद्धंचेतनस्यप्रवर्तकत्वं॥ नतुतवदेहादिसंयुक्तस्यापिआत्मनोज्ञानस्वरूपमात्रव्यतिरेकेणप्रवृत्यनुपपत्तेः॥ अनुपपन्नंप्रवर्तकत्वमितिचेत्॥

नापीति॥ यःप्रवर्तकःसस्वयंप्रवृत्तिमानश्वादिवदितिव्याप्येरात्मनिव्यापकाभावान्नप्रवर्तकत्वमितिकश्चिच्छंकते॥ नचेति॥

मण्यादौव्यभिचारान्नव्याप्तिरितिपरिहरति॥नेति॥वस्तुतःएकत्वेपिकल्पितंद्वैतंप्रवर्त्तयत्सत्सा ह
नाविद्येति॥अविद्ययाकल्पितेनानामरूपप्रपंचेतयैवाविद्यारूपयामायययाआवेशाच्चिदात्मनःकल्पितः

नआयस्कांतवदूपादिवच्चप्रवृत्तिरहितस्यापिप्रवर्त्तकत्वोपपत्तेः॥यथायस्कांतोमणिःस
यंप्रवृत्तिरहितोप्ययःप्रवर्त्तकोभवति॥यथावारूपादयोविषयाःस्वयंप्रवृत्तिरहिताअपि
चक्षुरादीनांप्रवर्त्तकाभवंति॥एवंप्रवृत्तिरहितोपीश्वरःसर्वज्ञःसर्वगतःसर्वात्मासर्वशक्ति
श्चसन्सर्वंप्रवर्त्तयेदित्युपपन्नं॥एकत्वात्प्रवर्त्याभावेप्रवर्त्तकत्वानुपपत्तिरितिचेन्न॥अ
विद्याप्रयुपस्थापितनामरूपमायावेशवशेनासकृत्प्रयुक्तत्वात्॥तस्मात्संभवतिप्रव
त्तिःसर्वज्ञकारणत्वे॥नत्वचेतनकारणत्वे॥ पयोंबुवच्चेत्तत्रापि ॥ ॥

संबंधःतस्यनशःसामर्थ्यंतेनांतर्यामित्वादिकमीश्वरस्ययुक्तत्वान्नचाद्यावसरस्यर्थः॥ ॥

॥७॥

अनादिजडस्यप्रवृत्तिःचेतनाधीनाप्रवृत्तित्वाद्रथादिप्रवृत्तिवदितिस्थितंतत्रक्षीरादौव्यभिचारमाशंक्य
तस्यापिपक्षसमत्वेनोक्तानुमानादागमेनचसाध्यसिद्धेर्नव्यभिचारइतिसूत्रंव्याचष्टे॥स्यादेतदिसादिना॥

स्यादेतद्यथाक्षीरमचेतनंस्वभावेनैववत्सविरुध्यर्थंप्रवर्त्तते॥यथाचजलमचेतनंस्वभावेनैव
लोकोपकारायस्यंदते॥एवंप्रधानमचेतनंस्वभावेनैवपुरुषार्थसिद्धयेप्रवर्त्तिष्यतइति॥नैतत्सा
धूच्यते॥यतस्तत्रापिपयोंबुनोश्चेतनाधिष्ठितयोरेवप्रवृत्तिरितिअनुमिमीमहे॥उभयवादि
त्वसिद्धेश्चरथादावचेतनेकेवलेप्रवृत्यदर्शनाद्धेतोश्च॥योऽसुतिमुन्योऽपोतरोयमयतिएतस्यवाक्ष
रस्यप्रशासनेगार्गिद्यावापृथिव्यौविधृतितिष्ठतएतस्यवाअक्षरस्यप्रशासनेगार्गिप्राच्योन्यानद्यःस्यंदंतेश्वेतेभ्योगिरिभ्यःप्रतीच्योयंयंसमस्तस्यलोकस्यपरिस्यंदितस्येश्वराधिष्ठि
तत्वंश्रावयति॥तस्मात्साध्यपक्षेनिक्षिप्तत्वात्पयोंबुवदित्युपन्यासः॥चेतनायाश्चधेन्वाःस्नेहेच्छ
यापयसःप्रवृत्तेरुपपत्तेः॥नतुस्नेहेनचपयसआकृष्यमाणत्वान्नचांबुनोप्ययंतमनपेक्षानि
म्नभूम्याद्यपेक्षत्वात्स्यंदनस्यचेतनापेक्षत्वंतुसर्वत्रोपदर्शितं॥

साध्यपक्षेतिसाध्यवत्पक्षेणतुल्यत्वादितिसूत्रार्थः॥अनुपन्यासोनव्यभिचारभूमिरितियावत्॥क्षीरप्रवृत्त
वत्तेनधेन्वादेःसत्वाच्चनव्यभिचारइतिह॥चेतनायाश्चेतिउपदर्शितमनुमानागमाभ्यांइतिशेषः॥ ॥

सूत्रकारस्य क्षीरवदित्याप्तिवचनः पूर्वापरविरोधमाशंक्य लोकदृष्ट्या शास्त्रदृष्ट्या चसूत्रद्वयमपि विरोधमाह॥उपसंहारेति॥अस्तुप्रधानस्यापि धर्मादिकर्मपुरुषो वाप्रवर्त्तकइत्याशंक्यसूत्रंप्रवर्त्तंतद्व्याचष्टे॥सर्वेति॥सादिना॥प्रधानव्यतिरेकेणकर्मणोऽनवस्थितेःपुरुषस्योदासीनत्वात्कदाचित्सृष्टिप्रवृत्तिः उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धीसूत्रेनवाद्यमिनिमित्तनिरपेक्षमपिस्वाश्रयंकार्यंभवतीयेत लौकदृष्ट्यानिदर्शितं॥शास्त्रदृष्ट्यातुपुनःसर्वत्रेश्वरापेक्षत्वमापद्यमानंनपराणुद्यते॥व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥सांख्यानांप्रत्यगुणाःसाम्येनावतिष्ठमानाःप्रधानंनतुतद्व्यतिरेकेणप्रधानस्यप्रवर्त्तकंनिवर्त्तकंवाकिंचिद्बाह्यमपेक्षमवस्थितमस्ति॥पुरुषस्तूदासीनोनप्रवर्त्तकोननिवर्त्तकइत्येतेनापेक्षेप्रधानमनपेक्षत्वाच्चकदाचित्प्रधानंमहदाद्याकारेणपरिणमतेकदाचिन्नपरिणमतइत्येतदयुक्तं॥ईश्वरस्यतुसर्वज्ञत्वात्सर्वशक्तित्वान्महामायत्वाच्चप्रवृत्तिप्रवर्त्तनविरुध्येते॥

कदाचित्प्रलयइत्युक्तंइत्यर्थः॥कर्मणोपिप्रधानस्यात्मकस्याचेतनत्वात्सदासत्वाच्चनकदाचित्प्रवृत्तिनियामकत्वमितिभावः

॥८॥

पुनरपिदृष्टांतबलात्प्रधानस्यस्वतएवकदाचित्प्रवृत्तिरितिशंकांनिषेधतिसूत्रकारः॥अन्यत्रेतिसादिना॥पद्यति॥

अन्यत्राभावाच्चनतृणादिवत्॥स्यादेतत्॥यथातृणपल्वलोदकादिनिमित्तांतरनिरपेक्षत्वभावादेवक्षीरंधाकारेणपरिणमते॥एवंप्रधानमपिमहदाद्याकारेणपरिणंस्यतइति॥कथंचनिमित्तांतरनिरपेक्षंतृणादीतिगम्यते॥निमित्तांतरानुपलंभात्॥यदिहिकिंचिन्निमित्तमुपलभेमहितोयथाकामंतेनतृणाद्यपादायक्षीरंसंपादयेमहि॥नतुसंपादयामहे॥तस्मात्स्वाभाविकस्तृणादेःपरिणामः॥तथाप्रधानस्यापिस्यादिति॥अत्रोच्यते॥भवेत्तृणादिवत्स्वाभाविकःप्रधानस्यापिपरिणामोयदितृणादेरपिस्वाभाविकःपरिणामोभ्युपगम्येत॥नतभ्युपगम्यतेनिमित्तांतरोपलब्धेः॥कथंनिमित्तांतरोपलब्धिरन्यत्राभावात्॥धेन्वादिवद्युपयुक्तंतृणादिक्षीरीभवति॥नप्रहीणमनुद्रुहाद्युपयुक्तंवा॥यदिहिभवतिनिर्निमित्तमेवतत्स्यादेनुशरीरसंबंधादन्यत्रापितृणादिक्षीरीभवेत्॥

थमिति॥उत्तरंनिमित्तांतरेति॥धेन्वादिनिमित्तांतरंअस्तीतिसिद्धांतयति॥अत्रोच्यतइति॥प्रहीणंनष्टं॥

यदुक्तं क्षीरस्य स्वेच्छया संपादयितुमशक्यत्वात्स्वाभाविकत्वमितितत्राह॥ नचयथाकाममिति॥ प्रधान
नचयथाकामंमानुषैर्नशक्यंसंपादयितुमिसेतावतानिर्निमित्तःभवति॥ भवतिहिकिंचित्का
र्यंमानुषसंपाद्यंकिंचिद्दैवसंपाद्यं॥ मनुष्याअपिरङ्कुवंशेकोचिन्नोपायेनतृणाद्युदपाय
क्षीरंसंपादयितुंप्रभूतंहिक्षीरंकामयमानाःप्रभूतंघासंधेनुंचारयंति॥ ततश्चप्रभूतंक्षी
रंलभंते॥ तस्मान्नतृणादिवत्स्वाभाविकःप्रधानस्यपरिणामः॥ अभ्युपगमेप्यर्थाभावात्॥

स्वाभाविकीप्रधानप्रवृत्तिर्नभवतिइतिस्थापितं॥ अथापिनामभवतःश्रद्दामनुरुध्य
मानाःस्वाभाविकीमेवप्रधानस्यप्रवृत्तिमभ्युपगच्छेम॥ तथापिदोषानुषज्येतैवकुतोऽर्थ
भावात्॥ यदितावत्स्वाभाविकीप्रधानस्यप्रवृत्तिः॥ नकिंचिदन्यद्धेतूपेक्षतइत्युच्येत॥ ततो
यथैवसहकारिकिंचिन्नापेक्षते॥ एवंप्रयोजनमपिकिंचिन्नापेक्षेत॥

स्यस्मतःप्रवृत्तिः स्मतःप्रवृत्यभ्युपगमेपुरुषार्थस्यापेक्षाभावप्रसंगादितिकोर्थः॥

तन्नेष्टापत्तिं निरस्यति॥ इयतःप्रधानमिति॥ उक्तप्रसंगस्येष्टेतिस्तुहानिःस्यादित्यर्थः॥ अर्थासंभ
वस्मतःप्रवृत्तिरित्यर्थोनरशंकोपूर्वकमाह॥ सयदीत्यादिना॥ प्रयोजनमपेक्षितंचेदुक्तव्यमित्याह॥ तथा
पीति॥ बुद्धस्थेपुरुषेस्मतःस्मरणादिरूपस्यातिशयस्याधानुमशक्यत्वादध्यासानंगीकाराच्चभोगोनयुक्तः॥

इयतःप्रधानंपुरुषस्यार्थंसाधयितुंप्रवर्त्तत इयंप्रतिज्ञाहीयेत॥ सयदिब्रूयात्सहकार्यन्तरंकं
नापेक्षतेनप्रयोजनमपीति॥ तथापिप्रधानप्रवृत्तेःप्रयोजनंनिवेदनीयं॥ भोगोवास्यादपवर्गो
वोभयंवेति॥ भोगश्चेत्कीदृशोऽनाधेयातिशयस्यपुरुषस्यभोगोभवेदनिर्मोक्षप्रसंगश्चापवर्गश्चे
त्प्रागपिप्रवृत्तेरपवर्गस्यसिद्धत्वात्प्रवृत्तिरनर्थिकास्यात्॥ शब्दाद्यनुपलब्धिप्रसंगश्च॥

किंचप्रधानप्रवृत्तेर्भोगार्थत्वेमोक्षहेतुविवेकस्यासंभवादनिर्मोक्षप्रसंगश्च॥ अपवर्गार्थत्वेस्व
रूपानस्थानरूपमुक्तेस्मतःसिद्धत्वात्प्रवृत्तिवैयर्थ्यंभोगाभावप्रसंगश्चेत्यर्थः॥

तृतीयंदूषयति॥उभयार्थमेतिति॥भोग्यंतेभुज्यंतेइतिभोग्याः॥औत्सुक्यनिवृत्यर्थंयथाक्रियासु प्रवर्त्ततेलोकःपुरुषस्यविमोक्षार्थंप्रवर्त्ततेतद्वदव्यक्तमितिकारिकोक्तंदूषयति॥नचेति॥औत्सुक्य मिच्छानिशेषः॥कथंतर्ह्यजडस्यात्मनोवानयुक्तइत्यर्थः॥अस्तिपुरुषस्यदृक्शक्तिःचिद्रूपत्वात्॥अस्ति

उभयार्थत्वाभ्युपगमेपिभोक्तृत्वानोप्रधानमात्राणामानंत्यादनिर्मोक्षप्रसंगएव॥न चौत्सुक्यनिवृत्यर्थाप्रवृत्तिः॥नहिप्रधानस्याचेतनस्यौत्सुक्यंसंभवति॥नचपुरुषस्य निर्मलस्यनिष्फलस्यौत्सुक्यंदृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत्प्रवृत्तिः॥तर्हिदृक्शक्त्य नुच्छेदवत्सर्गशक्त्युच्छेदादनिर्मोक्षप्रसंगएव॥तस्मात्प्रधानस्यपुरुषार्थीप्रवृत्तिरयुक्त दयुक्तं॥

चप्रधानस्यसर्गशक्तिःत्रिगुणत्वात्॥तयोःशक्त्योःदृक्सृष्टिंविनासार्थक्यायोगात्प्रधानस्यसृ ष्टौप्रवृत्तिरितिचेन्नशक्तेर्नित्यौत्सृष्टिनित्यत्वापत्तिरित्याह॥दृक्शक्तीति॥

पुरुषस्यप्रवर्त्तकत्वंनिरस्तमपिदृष्टांतेनपुनराशंक्यनिषेधति॥पुरुषवदिति॥प्रधानस्यस्वतंत्र पुरुषस्योदासीन्यंवाऽभ्युपेत्यंत्यज्यतेइतिवृद्धंसांख्यंप्रसाह॥कथंचेति॥पुरुषस्यपरिस्पंदःप्रयत्न णोवानास्तीतिवक्तुंहेतुद्वयं॥प्रधानपुरुषौनित्यताव्यापित्वान्नित्यःसन्निधिः॥अश्मनस्तुपरिम

पुरुषवदितिचेत्तथापि॥स्यादेतत्यथाकश्चित्पुरुषोदृक्शक्तिसंपन्नःप्रवृत्तिशक्तिविहीनःपंगु रपरंपुरुषंप्रवृत्तिशक्तिसंपन्नंदृक्शक्तिविहीनेअंधमधिष्ठायप्रवर्त्तयति॥यथायस्कांतोऽ स्मासन्नयमप्रवर्त्तमानोऽप्रेयःप्रवर्त्तयति॥एवंपुरुषःप्रधानंप्रवर्त्तयिष्यतीतिदृष्टांतप्रत्ययेन पुनःप्रसक्तस्यानमात्रोच्यते॥तथापिनैवदोषान्निर्मोक्षोत्ति॥अभ्युपेतहानंतावद्दोषआपत तिं॥प्रधानस्यस्वतंत्रस्यप्रवृत्त्यभ्युपगमात्पुरुषस्यचप्रवर्त्तकत्वानभ्युपगमात्॥कथंचोदासी नःपुरुषःप्रधानंप्रवर्त्तयेत्॥

जनंसज्जुतेनस्थापनमनित्यसन्निधिश्चेति॥

ननुचिज्जडयोर्दृष्टस्य भावयोग्यतास्तितयातद्भावः संबंधइत्यतआह॥ योग्येति॥ चिज्जडस्वरूपा योग्यताया नियतात्संबंधनियतापत्तिरित्यर्थः॥ यथास्वतंत्रप्रधानप्रवृत्तिपक्षोभोगोऽपवर्गःउभयंवाफलमि पंगुरपिहिअधंनागादिभिःपुरुषंप्रवर्त्तयति॥ नैवंपुरुषस्यकश्चिदपिप्रवर्त्तनव्यापारोस्ति॥ नि ष्क्रियत्वात्॥ निर्गुणत्वाच्च॥ नाप्ययस्कांतवत्सन्निधिमात्रेणप्रवर्त्तयेत्॥ संनिधिनिमित्तेन प्रवृत्तिनियतप्रसंगात्॥ अयस्कांतस्यतुअनियतसंनिधिरस्तिस्वव्यापारसंनिधिपरि मार्जनाद्यपेक्षाचास्तीत्यनुपन्यासः॥ पुरुषाश्मवदिति॥ तथाप्रधानस्याचेतन्यात्पुरुषस्य चौदासीन्यात्तृतीयस्यचतयोःसंबंधुरभावात्संबंधानुपपत्तिः योग्यतानिमित्तेचसंबंधे योग्यतानुच्छेदादनिमोक्षप्रसंगः॥ पूर्ववच्चेहाप्यर्थाभावोविकल्पयितव्यः॥

ति निकल्पदूषणमि॥ एवंपुरुषाधीनप्रधानप्रवृत्तिपक्षोपिफलाभावेनदूषयतीत्यइसाह॥ पूर्व वच्चेति॥

सिद्धांतेपरमात्मनउदासीनस्यकथंप्रवर्त्तकत्वमिसाशंक्याह॥ परमात्मेति॥ सांख्यमतेउभयंविरुद्धं स्यात्॥ अस्मन्मतेकस्थिताकस्थितयोरविरोधइतिशयः॥ किंप्रधानावस्थाकूटस्थनित्यासउतविकारि णी॥ आद्येदोषमाह॥ अंगांगिभावेसाम्यस्वरूपनाशःस्यात्॥ ततःकौटस्थ्यभंगइतिभयादंगांगितानुपप

परमात्मनस्तुस्वरूपव्ययाश्रयमौदासीन्यंमायाव्ययाश्रयंचप्रवर्त्तकत्वमितिअतिशयः॥ अं गितानुपपत्तेश्च॥ इतश्चप्रधानस्यप्रवृत्तिरवकल्पते॥ यद्विसत्वरजस्तमसांअन्योन्यगुणप्रधान भावमुत्सृज्यसाम्येनस्वरूपमात्रेणावस्थानंसाप्रधानावस्थातस्यामवस्थायामनपेक्षत्वरू पाणांस्वरूपप्रणाशाभयात्परस्परप्रसंगांगिभावानुपपत्तेः॥ बाह्यस्यकस्यचिक्षोभयितुरभा वात्गुणवैषम्यनिमित्तोमहदाद्युत्पादोनस्यात्॥

त्तेः॥ सृष्ट्यनुपपत्तिरित्यर्थः॥ द्वितीयंदूषयति॥ बाह्यस्येति॥ चिरकालंस्थितस्यसाम्यस्यच्युतौनिमि त्तंवाच्यंनत्वास्तीत्यर्थः॥

गुणानांमिथोऽनपेक्षस्वभावत्वान्नस्वतोवैषम्यमियुक्तं॥ तत्रेदंसिद्धिमाशंक्यसूत्रकारःपरि
हरति॥अन्यथेति॥अनपेक्षस्वभावादन्यथासापेक्षतेनगुणानामनुमानात्पूर्वसूत्रोक्तोदोषो

अन्यथानुमितौचेतनशक्तिवियोगात्॥अथापिस्यादन्यथावयमनुमिमीमहे॥यथा
नायमनंतरोदोषःप्रसज्यते॥नह्यनपेक्षस्वभावाःकूटस्थाश्चास्माभिर्गुणाअभ्युप
गम्यंते॥प्रमाणाभावात्॥कार्यनश्चेनलुगुणानांस्वभावोभ्युपगम्यते॥यथायथाका
र्योत्पादउपपद्यतेतथातथाएषांस्वभावोभ्युपगम्यते॥चेतनंगुणवृत्तमितिचास्त्य
भ्युपगमः॥तस्मात्साम्यावस्थायामपिवैषम्योपगमयोग्याएवगुणाअवतिष्ठंत
इति॥

नप्रसज्यते॥नचैवमपसिद्धांतःकार्यानुसारेणगुणस्वभावांगीकारादिसाह॥चेतनंगुणवृत्त
मिति॥

पूर्वसूत्रोक्तांगित्वानुपपत्तिदोषाभावमंगीकृत्यपरिहरति॥एवमपीति॥कार्यार्थंज्ञानशक्तिक

एवमपिप्रधानस्यज्ञशक्तिवियोगादचेतनानुपपत्त्यादयःपूर्वोक्तादोषातदवस्थाएव
ज्ञशक्तिमपितनुमिमानःप्रतिवादिनान्निवर्त्तेत॥चेतनमेकमनेकप्रपंचस्यजगत
उपादानमितिब्रह्मवादप्रसंगात्॥वैषम्योपगमयोग्याअपिगुणाःसाम्यावस्थायांनि
मित्ताभावान्नैववैषम्यंभजेरन्नभजमानावानिमित्ताभावानिरोधात्॥सर्वदैववै
षम्यंभजेरन्नितिप्रसज्यतएवायमनंतरोदोषः॥

चेतनेब्रह्मवादःस्यादित्यर्थः॥अंगीकारंत्यजतीति॥वैषम्येति॥

स्त्रंव्याचष्टे॥परस्परेति॥तत्रघ्राणमेवज्ञानेंद्रियमेकमनेकगंध्यादिज्ञानकारणं॥पंचकर्मेंद्रियाणिमनश्चेतिसप्तेंद्रियाणिज्ञानेंद्रियाणिपंच॥कर्मेंद्रियाणिपंचमनश्चेत्येकादशबुद्धिरहंकारोमनस्तितत्रीणि॥एकबुद्धिरेव॥एवं पूर्वापरविरोधादितिव्याख्यायश्रुतिस्मृतिविप्रतिषेधाच्चेत्यर्थांतरमाह॥प्रसिद्धरिति॥तस्माद्भ्रांतिमूलत्वात्सा

विप्रतिषेधाच्चासमंजसं॥परस्परविरुद्धश्चायंसांख्यानामभ्युपगमः॥क्वचित्सप्तेंद्रियाण्यनुक्रामंतिक्वचिदेकादश॥तथाक्वचिन्महत्तत्तन्मात्रसर्गमुपदिशंति॥क्वचिदहंकारात्तथाक्वचित्त्रीण्येतेकरणान्यिनर्णयंति॥क्वचिदेकमिति॥प्रसिद्धएवतुश्रुत्यैश्चरकारणवादिन्याऽविरोधः॥तदुनुवर्त्तिन्याचस्मृत्या॥तस्मादप्यसमंजसंसांख्यानांदर्शनंमिति॥अत्राह॥नन्वेषनिषेदानामपिअसमंजसमेवदर्शनं॥तथ्यतापकयोर्ज्यात्येतरभावानभ्युपगमात्॥ न्यशास्त्रस्यतेननिर्दोषवेदांतसमन्वयस्यनविरोधइतिसिद्धं॥त्वमलाऽसामंजस्यमसहमानःसांख्यःप्रत्यवतिष्ठते॥अत्राहेति॥तथ्योजीवस्तापकःसंसारीतस्तयोर्भेदानंगीकारालोकाप्रसिद्धस्तथ्यतापकभावोलुप्यतेत्यर्थः॥

विनृणोति॥एकंहीति॥तथाचभेदव्यवहारलोपइत्यसमंजसमित्यर्थः॥ननुतयोरुत्पादानैक्येपिमिथोभेदोस्त्येव॥यथैकवृक्षात्म्यात्मकयोरौच्यप्रकाश्ययोरितरेतरव्यवहारलोपइत्याशंक्यनहीरितताभ्यामात्मनो

एकंहित्रह्मसर्वात्मकंसर्वस्यप्रपंचस्यकारणमभ्युपगधतां॥एकस्यैवात्मनोविरोधौतथ्यतापकौनानुसंतरंतरेतरस्याभ्युपगंतव्यंस्यात्॥यदिचैतौतथ्यतापकौएकस्यात्मनोविरोधौस्यातांसताप्यातप्यतापकाभ्यांनमुच्यतइतितापोपशांतयेसम्यग्दर्शनमुपदिशतश्शास्त्रमनर्थकंस्यात्॥नह्यौषधप्रकाश्यधर्मस्यप्रदीपस्यतदवस्थस्यैवताभ्यांनिर्मोक्षउपपद्यते॥योपिजलतरंगवीचीफेनाद्युपन्यासस्तत्रापिजलात्मनएकस्यवीच्यादयोविरोधाआविर्भावतिरोभावरूपेणनित्याएवेतिसमानोजलात्मनोवीच्यादिभिरनिर्मोक्षः॥॥

लोपानस्यादित्याह॥यदिचेत्यादिना॥ननुसत्यपिधर्मिणिस्वभावनाशोमोक्षउपपद्यते॥सत्येवजलेवीच्यादिनाशेदर्शनादित्याशंक्यदृष्टांतासिद्धिमाह॥योपीति॥

किंच॥भेदांगीकारेऽपसिद्धांतः॥अनंगीकारे लोकप्रसिद्धबाधरूपाह॥प्रसिद्धश्चेति॥अर्थोद्यर्जनाऽलाभादिनाऽर्थिनं तापयतीतितापकः अर्थीतप्यस्तयोर्भेदबाधकमाह॥यदीति॥अर्थिनोऽन्यस्यार्थस्याभावादर्थितापकवदर्थिदन्यस्यार्थिनोसतादर्थताभावः प्रसज्येतेत्याह॥तथार्थस्यापीति॥प्रसंगस्येष्टत्वं निराकरोति॥न प्रसिद्धश्चायंतप्यतापकयोर्जायंतरभावोलोकेतथाहि॥अर्थश्चार्थश्चान्योन्यभिन्नौलक्ष्येते॥ यद्यर्थिनःस्वतोऽन्योर्थोनस्याद्यस्यार्थिनोयद्विषयमर्थित्वं सतस्यार्थोनियसिद्धएवेतिनतस्यतद्विषयमर्थित्वंस्याद्यथाप्रकाश्यात्मनःप्रदीपस्यप्रकाश्यार्थोनियसिद्धएवेतिनतस्यतद्विषयमर्थित्वंभवत्येवंप्राप्तेयर्थोऽर्थित्वंस्यादिति॥तथार्थस्यायर्थोर्थित्वंनस्यात्स्वार्थत्वमेवस्यात्॥नचैतदस्ति॥

नचैतदस्तीति॥अर्थत्वंहिकामनाविषयत्वंतच्चकाम्यादन्यस्यकामयितुरस्तान्नस्यान्नहिस्वार्थमस्ति॥कामस्यैवकामयितृत्वायोगात्तत्स्माद्भेदांगीकार्यइत्यर्थः॥

इतश्चभेदइत्याह॥संबंधीति॥तथाऽनर्थानर्थिनावपिभिन्नाविषयत्वयः॥अर्थानर्थयोःस्वस्वोक्तिपूर्वकंतापकत्वंस्फुटयति॥अर्थिनोऽनुकूलइति॥अद्वैतमतेमुक्तेरयोगमुक्त्वास्वमतेयोगमाह॥जायंतरेति॥तयातप्यतापकभावापुरुषस्यसंयोगःस्वस्वामिकः॥तस्येहेतुरनादिरविवेकस्तस्यपरिहारोविवेकस्तस्मान्निःसमुक्तत्वेपिसंबंधिशब्दौद्वौतौअर्थीचार्थश्चेतिद्वयोश्चसंबंधिनोःसंबंधःस्यान्नैकस्येन॥तस्माद्भिन्नावेतौअर्थार्थिनौ॥तथाऽनर्थानर्थिनावपिअर्थिनोऽनुकूलोऽर्थःप्रतिकूलोऽनर्थस्ताभ्यामेकःपर्यायेणोभाभ्यांसंबध्यते॥तत्रार्थस्यात्वीयस्तात्भूयस्ताच्चानर्थस्योभावपिअर्थानर्थावनर्थएवेतितापकःसउच्यते॥तप्यस्तत्पुरुषोयएकःपर्यायेणोभाभ्यांसंबध्यतेइतितयोःतप्यतापकयोरेकात्मतायांमोक्षानुपपत्तिः॥जायंतरभावेतुतत्संयोगहेतुपरिहारात्स्यादपिकदाचिन्मोक्षोपपत्तिरिति॥

पुरुषस्यकथंचिदुपचारान्मोक्षोपपत्तिरित्यर्थः॥

यथायोर्बंधगतौ जयपराजयौ राजन्युपचर्येते॥ तथा पुरुषादसंतभिन्नबुद्धिगतौ बंधमोक्षौ पुरुषेउपचर्येते॥ तदुक्तं॥ सैव च बध्यते मुच्यतइति॥ सिद्धांतयति॥ अत्रेति॥ किंपरमार्थदृष्ट्यालप्यतापकभावानुपपत्तिरुच्यते॥ व्यवहारदृष्ट्या वा॥ नाद्यइत्याह॥ नैकतादेवेति॥ दोषतमिति शेषः॥ अस्याअत्रोच्यते॥ नैकतादेवतप्यतापकभावानुपपत्तेर्भवेदेषदोषः॥ यद्येकात्मतायांतप्यतापकावन्योन्यस्यविषयविषयिभावंप्रतिपद्येयातां॥ नतेतदस्ति॥ एकतादेव॥ नह्यग्निरकःसन्स्वमात्मानंदहतिप्रकाशयतिसन्योऽध्यप्रकाशादिधर्मभेदेपरिणामितेनकिंकूटस्थेब्रह्मण्येकस्मिन्तप्यतापकभावः संभवेत्॥ कपुनरयंतप्यतापकभावःस्यादितिउच्यते॥ किंनपश्यसिकर्मभूतोजीवदेहस्तप्यस्तापकःसवितेति॥

अदोषत्वंविवृणोति॥ भवेदित्यादिना॥ एकत्वातिरिक्तविषयविषयित्वंनतस्तीत्यर्थः॥ यत्रतप्यतापकभावोदृष्टस्तत्रैवेतिव्यवहारपक्षमादायसिद्धांतीब्रूतेकिन्नपश्यसीति

देहस्यतप्यतेदेहात्मवादापत्तिरितिशंकते॥ नन्विति॥ अचेतनस्यैवदेहस्यतप्तिर्नेतिवदतासांख्येननन्वतप्तिर्नामदुःखंसाचेतयितुर्नाऽचेतनस्यदेहस्य॥ यदिद्विदेहस्यैवतप्तिःस्यात्सादेहनाशेत्वयैवनश्यतीतितन्नाशायसाधनंनैषितव्यंस्यादिति॥ उच्यते॥ देहाभावेपिकेवलस्यचेतनस्यतप्तिर्नदृष्टा॥ नचतयापितप्तिर्नामक्रियाचेतयितुःकेवलस्येष्यते॥ नापिदेहचेतनयोःसंहतत्वमभ्युपगम्यदोषप्रसंगात्॥ नचतत्परेवतप्तिमभ्युपगच्छसीति॥ कथंतर्हितप्यतापकभावःसन्तेतप्यंतापकंरजइतिचेत्

वक्तव्यं॥ किंचेतनस्यकेवलस्यतप्तिः॥ किंनादेहसंहतस्यउतदेहस्यआहोस्वित्सहतस्यवाघरसाहउच्यतइति॥ नद्वितीयतृतीयविसाह॥ नापीत्यादिना॥ चतुर्थंशंकते॥ सत्यमिति॥

सत्वरजसोस्तप्यतापकत्वेपुरुषस्यबंधाभावाद्धास्त्रारंभवैयर्थ्यमितिपरिहरति॥नलाभ्यामिति॥अस्मगलेपिपुरुषस्यतप्यसत्वप्रतिबिंबत्वात्तप्तिरितिशंकते॥सत्वेति॥तर्हि जलचंद्रस्यचलनवन्मिथ्येनतप्तिरियमित्यक्षःआगलदाह॥परमार्थतइति॥इवशब्दमात्रेणकथंमिथ्यात्वप्राप्तिरितिचेदुच्यते॥इवशब्दस्तप्यबुद्धिसत्वसादृश्यंब्रूते॥तच्चसादृश्यंपुरुषस्यतप्यस्वरूपंचेत्कल्पितमेवनस्तुनताभ्यांचेतनस्यसंहतत्वानुपपत्तेः॥सत्वानुरोधिताचेत्तनोपितप्यतएवेतिचेत्॥परमार्थतस्तुहिनैवतप्यतदापत्तिर्नशब्दप्रयोगात्॥नचेत्तप्यतेनेवशब्दोदोषाय॥नहिदुंदुभेःसर्पदृष्टेत्यत्रनलासमिकोपनतिसर्पोवादुंदुभइवनलानिर्विषोऽतश्चाविद्याकृतोऽयंतप्यतापकभावेःनपरमार्थिकइत्यभ्युपगंतव्यमितिनैवंसतिममापिकिंचित्दूषयति॥

तत्तत्स्यमानादिसुपपादयतिनचेदितिपुरुषोवस्तुतस्तप्तिशून्यश्चेदिवेशब्दोनदोषायमिथ्यातप्तिपरत्वादित्यर्थः॥मिथ्यासादृश्यमेवदोषइतिचेन्नेत्याह॥नहीति॥तद्विषयतेनिर्विषतेचेवशब्दार्थःकल्पितएवद्रष्टव्यः॥सांख्यस्याऽऽविद्यकेतप्यतापकतेसतिममापिकिंचिन्नदुष्यतिकिंतुइष्टमेवसंपन्नमित्यर्थः॥

॥१७॥

यदिमिथ्यातप्यतांगीकरोऽपसिद्धांतःस्यादितिभीसासयंतप्यतेपुरुषस्योचेतेतथाप्यपसिद्धांतः॥कौटस्थ्यहानादनिर्मोक्षश्चसत्यस्यात्मनोनिवर्त्यत्वायोगादित्याह॥अथेत्यादिना॥किंचरजसोनिसर्गतोदुःखसाधनत्वमित्याहनियतेतिअत्रसांख्यःशंकतेतप्येतिसत्पुरुषोवातप्यशक्तिः॥तापकस्तुरजःनिमित्तमविद्यात्मकम

अथपारमार्थिकमेवचेतनस्यतप्यत्वमभिगच्छसि॥तर्ह्येवसुतरामनिर्मोक्षःप्रसज्येत॥निसर्गाभ्युपगमाच्चतापकस्य॥तप्यतापकशक्त्योर्नियतेपिसनिमित्तसंयोगापेक्षत्वात्तयोः॥संयोगनिमित्तादर्शननिवृत्तावयंनिकःसंयोगपरमस्तत्तश्चायंतिकोमोक्षउपपन्नइतिचेत्॥

मदर्शनंतमःतेनसहितःसनिमित्तःसंयोगःपुरुषस्यगुणत्वाभितरूपःतदपेक्षत्वादित्यर्थः॥

मोक्षस्तस्याभावः॥ निमित्तस्य निवृत्यभावान्न मोक्षइति सिद्धांतीपरहरति॥ नेति॥ तमसो निवृत्यभावेपि विवेकेनो परमान्मोक्षइत आह॥ गुणानांचेति॥ चरमंगुणवृत्तमित्यंगीकारादिति भावः॥ परपक्षेवेदमादर्शनस्य तमसो नियतान्युपगमात्गुणानांचोद्भवाभिभवयोरनियतत्वादनियतः संयोगनिमित्तो परमइति नियोगस्यापिअनियतत्वात्संस्कारस्येवानिर्मोक्षोपपादनीयः स्यादोपनिषदस्यत्वात्मैकत्वाभ्युपगमादेकस्यच विषयविषयिभावानुपपत्तेः॥ विकारभेदस्यवाचारंभणमात्रत्वश्रवणादनिर्मोक्षशंकास्वप्नेपि नोपजायते॥ व्यवहारेतुयत्रयथादृष्टस्तस्यतापकभावस्तत्रतथैवसइतिनचोदितव्यःपरिहर्त्तव्योभाष्यकृतेति॥

अथमोक्षानुपपत्तिमुद्भाव्यस्वपक्षमुदाहरति॥ औपनिषदस्यइति॥ नस्तुतपकृतेनबंधाभावात्नमुक्तभावशंकावसरः॥ व्यवहारेतुभेदांगीकारात्तस्यतापकभावोबंधस्तज्ज्ञानात्तन्निवृत्तिश्चोपपद्यतइतिनचोद्यावसरः॥

॥१७॥

दृष्टानुवादेनमहद्दीर्घवदितिस्वमतस्थापनात्मकाधिकरणस्यसंगतिमाह॥ अथेति॥ यद्यपिसांख्यमतनिरासानंतरंपरमाणुवादोनिराकर्त्तव्यः॥ स्वमतस्थापनस्यस्मृतिपादेसंगतत्वात्तथापिपूर्वत्रप्रधानगुणानासुरवादीनांजगत्यनन्यथात्वधानस्यानुपादानत्वमुक्तं॥ तथाब्रह्मगुणचैतन्यानन्यथाद्ब्रह्मणोपिनोपादानत्वमितिदोषोदृष्टांतसंगतित्वाभादत्रस्वप्रधानकारणवादोनिराकर्त्तव्यः परमाणुकारणवादस्तुनीनिराकर्त्तव्यः॥ तत्रादौतावद्द्व्यणुकादिनाब्रह्मवादिनादोषउद्भाव्यतेसप्रतिसमाधीयते॥ तत्रायंवैशेषिकाणामभ्युपगमः॥ कारणद्रव्यसमवायिनोगुणाः कार्यद्रव्येसमानजातीयंगुणांतरमारभंते॥ शुक्लेभ्यस्तंतुभ्यश्शुक्लस्यपटस्यप्रसवदर्शनात्तादृपर्ययादर्शनाच्च॥ तस्माच्चेतनस्यब्रह्मणोजगत्कारणेऽभ्युपगम्यमानेकार्येपिजगतिचैतन्यसंभवेपात्तदर्शनात्तुनचेतनंब्रह्मजगत्कारणंभवितुमर्हतीतिरम्यमभ्युपगम्यंतदीयंयेवप्रक्रियायाव्यभिचारयति॥ महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यां॥ एषांतेषांप्रक्रियापरमाणवःकिलकेचिच्चिरकालंभनारब्धकार्यायोगंरूपादिमंतः॥ परिमोऽल्पपरिमाणाश्चतिष्ठंति॥ तेचपश्चादृष्टादिपुरःसराःसंयोगसचिवाश्चसंतोद्व्यणुकादिक्रमेणबृहंतंकार्यजातमारभंते॥ कारणगुणाश्चकार्येगुणांतरं॥

साधीयतइत्यर्थः॥ चेतनोब्रह्मणोजगत्सर्गवादीनेदंतसमन्वयोविषयः॥ सकिंयः समवायिकारणगुणः सकार्यद्रव्येसमानजातीयगुणारंभकस्तंतुरूपवदितिन्यायेनविरुध्यतेनवेतिसंदेहेन्यायस्याव्यभिचाराद्विरुध्यतइतिप्राप्तेव्यभि

यद्यपि नवित्वलक्षणत्वादियत्नचेतनादचेतनसर्गः साधितः॥ तथापि नैरोषिकन्यायस्यतदीयमप्रक्रियया व्यभिचारोक्त्यर्थत्वादस्यसूत्रस्यनगतार्थता प्रलयकालपरमाणवोनिश्चलाअसंयुक्तास्तिष्ठंति॥ सर्गकालेचारब्धवदात्मा

यदाद्वौपरमाणूद्व्यणुकमारभेतेतदापरमाणुगतरूपादिगुणविशेषाः॥ शुक्लादयोद्व्यणुकेशुक्लादीनपरानारभंते॥ परमाणुगुणविशेषस्तुपारिमंडल्यंनद्व्यणुकेपारिमंडल्यमपरमारभते

द्व्यणुकस्यपरिमाणांतरयोगाभ्युपगमात्॥ अणुमहत्तेहिद्व्यणुकवर्त्तिनीपरिमाणेवर्णयंति॥

संयोगात्तेषुकर्मभवतितेनसंयोगात्द्रव्यांतरसृष्टिर्भवति॥ कारणगुणाःकार्यगुणांतरमारभंतेइति॥ सामान्येनप्रक्रियामुक्त्वाविशेषतस्तामाह॥ यदाद्वाविति॥ परमाणुःपरिमंडलःतदूर्ध्वंपरिमाणंपारिमांडल्यमित्युच्यते॥ तच्चस्वमानजातीयगुणारंभकंनभवतीत्युक्तन्यायस्यव्यभिचारइतिभावः॥ ॥ ५

व्यभिचारेस्फुटमंतरमाह॥ यदापिद्वेइति॥ द्वेद्वेइतिशब्दद्वयंपठितव्यं॥ एवंसतिचतुर्भिर्द्व्यणुकैश्चतुरणुकारंभउपपद्यते॥ यथाश्रुतेतुद्वाभ्यांद्व्यणुकाभ्यांमहत्श्चतुरणुकस्यारंभोनयुज्यतेकारणगतंमहत्बहुत्वंविनाकार्यमहत्त्वयोगादिमत्त्वं॥ प्रकृतार्थकारास्तुयत्द्वाभ्यांद्व्यणुकाभ्यामारब्धंकार्यंमहदृश्यते॥ तस्येहेतुः॥ प्रचयोनामप्रशिलाक्षयवसंयोगइतिरावणप्रणीतेभाष्येदृश्यतेइतिचिरंतनावैशेषिकदर्शनभाष्यमाहुः॥ सर्वथापिद्व्यणुकग

यदापिद्वेद्व्यणुकेचतुरणुकमारभेते॥ तदापिसमानं॥ द्व्यणुकसमवायिनोशुक्लादीनामारंभकत्वं॥ अणुमहत्तेतुद्व्यणुकसमवायिन्यपिनेतिरारभेते॥ चतुरणुकस्यमहत्तदीर्घत्वपरिमाणयोगाभ्युपगमात्॥ यदापिबहवःपरमाणवोबहूनिवाद्व्यणुकानित्रिद्व्यणुकसहितोवापरमाणुःकार्यमारभते॥ तदापिसमानेषायोजना॥

गतरूपत्वाणुत्वपरिमाणयोरारंभकत्वाद्व्यभिचारः॥ यद्यपितार्किकाःद्व्यर्थेनपरमाणुभ्यांद्व्यणुकंत्रिभिर्द्व्यणुकैःत्र्यणुकमितिकल्पयंति॥ तथापितर्कस्याप्रतिष्ठानान्नियमइतिमत्वाह॥ यदापिबहवइति॥ कारणगुणाःशुक्लादयःसमानजातीयगुणारंभकाःकार्यद्रव्यपरिमाणंतुनकारणगुणपरिमाणारब्धंकिंतुकारणगतसंख्यास्यंइतिप्रक्रियालक्ष्येरसूचितार्थः॥

एवंप्रक्रियांदर्शयित्वासूत्रत्रयेणोदयनव्यभिचारमाह॥तदेवमिति॥परमाणुभ्यएवमहद्दीर्घंचेत्यनियतप्रक्रियामाश्रित्योक्तं॥नियतप्रक्रियामाश्रित्यव्यभिचारमाह॥यथाचेति॥अणुह्रस्वेभ्योद्व्यणुकेभ्योऽणुद्रव्यंनजायतेह्रस्वमपिनजायतइतिव्यभिचारइत्यर्थः॥सूत्रेणाशङ्क्याशङ्कार्थोऽनुक्ताणुसमुच्चयार्थः॥तथाचह्रस्वपरिमंडलाभ्यां

तदेवंयथापरिमाणोःपरिमंडल्यात्सतोऽणुह्रस्वंचद्व्यणुकंजायते॥महद्दीर्घंचत्र्यणुकादिन
परिमंडल्यं यथानाद्व्यणुकादणुह्रस्वंचसतोमहद्दीर्घंचत्र्यणुकंजायते॥नाणुनोतह्रस्वंए
वंचेतनाद्बुद्ध्यादयोऽचेतनंजगज्जनिष्यतइत्युपगमेकिंतवक्षिप्तं॥

द्व्यणुकपरमाणुभ्यांमहद्दीर्घाणुवच्चेतनादचेतनंजायतइतिसूत्रत्रयेयोजना॥तत्रह्रस्वान्महद्दी
र्घंत्र्यणुकंपरिमंडलादणुद्व्यणुकमितिविभागः॥

दृष्टांतवैषम्यंशंकते॥अथमन्यसइति अचेतनेनविरोधिगुणइत्युतआह॥नह्यचेतनेति॥कार्यद्रव्यस्यपरिमाणांत

अथमन्यसेविरोधिनापरिमाणांतरेणाक्रांतंकार्यद्रव्यंद्व्यणुकादीत्यतोनारंभकाणिकारणगतानि
परिमांडल्यादीनीत्यभ्युपगच्छामि ननुचेतनाविरोधिनागुणांतरेणजगताक्रांततत्समस्ति येनका
रणगताचेतनाकार्येचेतनांतरंनारभेत॥नह्यचेतनानामचेतनाविरोधीकश्चिद्गुणोस्ति चेतनाप्र
तिषेधमात्रतात्॥तस्मात्परिमांडल्यादिवैषम्यात्प्राप्तीतिचेतनायाआरंभकत्वमितिमैवंमंस्थाः
यथाकारणेविद्यमानानामपिपरिमांडल्यादीनामनारंभकत्वमेवंचैतन्यस्यापीत्यस्यांशस्यसमानता
त्॥नचपरिमाणांतराक्रांतत्वंपरिमांडल्यादीनामनारंभकत्वेकारणं॥प्राक्परिमाणांतरारंभात्
परिमांडल्यादीनामारंभकत्वोपपत्तेः॥

राक्रांततमंगीकृत्यनिरूपितांशसाम्यमाहैवमितिं॥अंगीकारंसूचयति॥नचेति॥उत्पन्नंहिपरिमाणांत
रंविरोधिभवतितदुत्पत्तेःप्राग्विरोध्यभावात्द्व्यणुकेपरिमांडल्यारंभःकिंनस्यादित्यर्थः॥ ॥ ॥

ननु विरोधिपरिमाणेनसहैवद्व्यंजायतइत्यतआह ॥आरब्धमपीति॥सहोत्पत्तावपसिद्धांतः॥अतोविरोध्य
भावःसिद्धइतिभावः॥अणुत्वाद्यारंभेव्यग्रत्वात्पारिमांडल्यादेःस्वसमानगुणानारंभकत्वमित्याशंक्यनिषेधति

आरब्धमपिकार्यद्व्यंप्राग्गुणारंभात्क्षणमात्रमगुणंतिष्ठतीत्युपगमात् ॥ नचपरि
माणांतरारंभेव्यग्राणिपारिमांडल्यादीनीयतःस्वसमानजातीयंपरिमाणांतरंनारभंते
परिमाणांतरस्यान्यहेतुत्वाभ्युपगमात् ॥ कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशे
षाच्चमहत् ---

नचेति॥ व्यग्रत्वमन्यथासिद्धिः तत्रहेतुःपरिमाणांतरस्येति अन्यहेतुकत्वे सूत्राण्युदाहरति
कारणेति॥कारणानांद्व्यणुकानांबहुत्वात् त्र्यणुकेमहत्परिमाणंमहत्त्वात् घटेमहद्द्वित्वंपिंडारब्ध
तिस्थूलपिंडेप्रचयादवयवसंयोगविशेषान्महत्त्वमित्यर्थः॥ ॥ ॥ ॥ ॥

महत्तत्वविरुद्धमणुत्वंपरिमाणुगतद्वित्वसंख्यायाद्व्यणुकेभवतीत्याह॥तदिति॥यन्महत्त्वस्यासमवायिकार
णंतदेवमहत्तत्समानाधिकरणस्यदीर्घत्वस्य॥यद्व्यणुकत्वस्यासमवायिकारणंतदेवाणुत्वाविनाभूतद्व्यत्व
स्यासमवायिकारणमित्यतिदिशति॥एतेनेति॥अतोमहत्त्वादौ॥अहेतुत्वात्पारिमांडल्यादीनांव्यग्रत्वमसिद्धं
तिभावः॥तेषांसन्निधिविशेषाभावान्नसमानगुणारंभकत्वंद्व्यस्यापिनवाच्यमित्याह॥नचेति॥पारिमांडल्या

तद्विपरीतमणु॥एतेनदीर्घत्वहस्वत्वेव्याख्याते॥इतिहिकाणभुजानिसूत्राणि ॥नचसन्निधान

विशेषात्कुतश्चित्कारणबहुत्वादन्यदारभंते॥नपारिमांडल्यादीनीयुच्येत॥द्व्यंतरेगुणांत
रेचारभ्यमाणेसर्वेषामेवकारणगुणानांस्वाश्रयसमवायाविशेषात्॥तस्मात्स्वभावादेवपारि
मांडल्यादीनामनारंभकत्वं॥तथाचेतनायाअपीतिद्रष्टव्यं॥

दीनामपिबहुत्वादिवत्त्वसमवायिकारणगतत्वाविशेषादित्यर्थः॥तेषामनारंभकत्वेकार्यद्व्यस्यविरोधिगु
णाभावेव्यग्रत्वमसन्निधिर्वानहेतुरित्युक्तिफलमाह॥तस्मादिति॥ ॥ ॥ ॥ ॥ ॥

यत्तु कारणगुणः स्वसमानगुणारंभकइति व्याप्तेः सामान्यगुणेषु परिमांडल्यादिषु व्यभिचारेपि योद्रव्यसमवायिकारणं
गतो विशेषगुणः स्वसमानजातीयगुणारंभकइति व्याप्तेश्चैतन्यस्य विशेषगुणत्वादारंभकत्वं दुर्वारमिति॥तन्मंदचित्र
पटहेतुतंतुगतेषु नीलादिरूपेषु विजातीयचित्ररूपहेतुषु व्यभिचाराच्चैतन्यस्यात्मनो गुणत्वाभावाच्चेति मंतव्यं।

संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्तिदर्शनात्॥समानजातीयोत्पत्तिव्यभिचारः॥द्रव्ये प्रकृते
गुणोदाहरणमयुक्तमितिचेन्न॥दृष्टांतेनविलक्षणारंभमात्रस्य विवक्षितत्वात्॥नचद्रव्य
स्यद्रव्यमेवोदाहर्तव्यंगुणस्यवा गुण एवेतिकश्चिन्नियमेहेतुरस्ति॥ ॥ ॥ ॥ ॥ ॥

तस्माच्चेतना द्विजातीयारंभो युक्तइति स्थितं॥तत्रोदाहरणांतरमाह॥संयोगाच्चेति॥ननुचेतनंद्रव्यस्य कार्यो
पादानत्वाद्द्रव्यंतन्नविलक्षणस्योपादानमितिप्रकृतेर्किंचिद्द्रव्यमेव विलक्षणकार्यकरमुदाहर्त्तव्यं
नसंयोगस्य गुणस्योदाहरणमितिशंकते॥द्रव्यइति॥गुणाद्द्रव्यवच्चेतनादचेतनारंभइतिविलक्षणारंभ
कत्वांशेऽयंदृष्टांतइतिपरिहरति॥नेति॥

॥२७॥

अनियमः कणादसंमतइत्याह॥सूत्रकारोपीति एतावताकथमनियमस्तत्राह॥एतदुक्तमिति॥नविलक्षणत्वन्यायेनपु
नरस्यभावेप्यतिदेशाधिकरणेनपुनरुक्तिरितिशंकते॥नन्वतिदेशइति॥समानगुणारंभनियमस्यपरिमांडल्य

सूत्रकारोपिभवतांद्रव्यस्यगुणमुदाजहार॥प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात्संयोगस्यपंचात्मकंन
नियतइति॥यथाप्रत्यक्षप्रत्यक्षयोर्भूम्याकाशयोः समवयन्संयोगोऽप्रत्यक्षएवंप्रत्यक्षाप्रत्यक्षेषु
पंचसुसमवयद्धरीरमप्रत्यक्षंस्यात्॥प्रत्यक्षंहिशरीरं॥तस्मान्नपांचभौतिकमिति॥एतदुक्तंभव
ति॥गुणश्चसंयोगोद्रव्यंशरीरंदृश्यतेविलक्षणाच्चापिविलक्षणोत्पत्तिःप्रपंचिता॥ननुचैवंसतिते
नैवतद्भूतंनेतिभ्रमः॥तत्सांख्यंप्रयुक्तं॥एतत्तुवैशेषिकंप्रति॥नन्वतिदेशोपिसमानन्यायतया
कृतएतेनशिष्टपरिग्रहाअप्यारब्धाताइति॥सत्यमेवतत्तेनत्वयंवैशेषिकप्रक्रियारंभेतस्य
क्रियानुगतेननिदर्शनेनप्रपंचःकृतः॥

दृष्टांतेनभंगार्थमस्यारंभइत्याह॥सत्यमितिं॥तस्यैवातिदेशस्येत्यर्थः॥वैशेषिकमतपरीक्षामार
भते॥

उभयथापिनकर्मातस्तदभावः ॥ नास्यप्रासंगिकेनपूर्वाधिकरणेनसंगतिरपेक्षितेतिमन्वानःप्रधानस्येश्वरानधिष्ठितस्य कारणत्वेपिपरमाणूनांतदधिष्ठितानांकारणत्वमस्तीतिप्रत्युदाहरणसंगत्यास्यास्याधिकरणानंतर्यमस्यवदंस्तात्पर्यमाह।इदानीमिति॥द्व्यणुकादिक्रमेणपरमाणुभिर्जगदारभ्यतेइतिवैशेषिकाराद्धांतोत्रविषयः।सकिंमानमूलोभ्रांतिमू

उभयथापिनकर्मातस्तदभावः ॥इदानीपरमाणुकारणवादंनिराकरोति॥सचवादरध्वंसमुत्तिष्ठतेघटादीनिहिलोकेसावयवानिद्व्याणिस्थानुगतैरेवसंयोगसचिवैस्तंतादिभिर्द्व्यैरारभ्यमाणानिदृष्टानितत्सामान्येनयावत्किंचित्सावयवंतत्सर्वंस्थानुगतैरेवसंयोगसचिवैस्तैस्तैर्द्व्यैरारब्धमितिगम्यते॥

लोकेतिसंदेहेपूर्वपक्षयति॥सचेति॥तैःपटादिभिःसामान्यंक्षितेरादिःकार्यद्रव्यंतेनेत्यर्थः॥विमतंसावयवंक्षित्यादिसंस्थानपरिमाणसंयोगसचिवानेकद्रव्यारब्धं॥कार्यद्रव्यत्वात्पटादिवदितिप्रयोगःस्वेष्टपरमाणुसिद्ध्यर्थानिसाध्यविशेषणानि॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥२२॥

नन्वेतावताकथंपरमाणुसिद्धिस्तत्राह॥सचायमिति॥विमतंसावयवंपक्षतावच्छेदकंयतोनिवर्त्ततेसन्नानपरिमाणस्यापकर्षस्यपर्यंतेतेनानवस्थानभूमितेनावगतःपरमाणुरित्यर्थः॥यावत्सावयवमनुमानप्रवृत्तेः॥द्व्यणुकन्यूनद्रव्यंनिरवयवंसिध्यतीतिभावः॥जगन्निमित्तवादीकार्यद्रव्यहेतुसिद्धिरितिवदंतंप्रत्याह॥

सचायमवयवावयविभागोयतोनिवर्त्ततेसापकर्षपर्यंतगतःपरमाणुःसर्वचेदंजगत्गिरिसमुद्रादिसावयवंसावयवत्वाद्घटवत्॥नचाकारणेनकार्येणसकलेनैमित्यतःपरमाणवोजगतःकारणमितिकणभुगभिप्रायः॥तानीमानिचतुर्विधानिभूम्यप्तेजःपवनाख्यानिसावयवान्युपलभ्यचतुर्विधाःपरमाणवःपरिकल्प्यंते॥

सर्वचेति॥विमतमाद्यत्ववत्सावयवत्वात्पटवदित्यर्थः॥हेतोरसिद्धिंनिरस्याप्रयोजनत्वंनिरस्यतिनचेति॥तेचतुर्विधाइत्यादीक्षायामाह॥तानीति॥

प्रलयेचैषामपि नाशान्नजगत्कारणत्वमित्याशंक्याह॥ तेषांचेति॥ अवयवानां विभागान्नाशाद्द्व्यणुकादयः

तेषांचापकर्षपर्यंतगतत्वेनपरतो विभागासंभवाद्विनश्यतांपृथिव्यादीनांपरमाणुपर्यंतोपि
भागो भवति॥ सप्रलयकालः तलः सर्गकालेवायवीयेषुणुष्वदृष्टापेक्षंकर्मोत्पद्यते॥ तत्कर्म
स्वाश्रयमणुमण्वंतरेण संयुनक्ति॥ ततोद्व्यणुकादिक्रमेणवायुरुत्पद्यते॥ एवमग्नेरेवमाप
एवंपृथिवीरेवमेवशरीरंसेंद्रियं॥ इत्येवंसर्वमिदं जगदणुभ्यः संभवति॥ अणुगतेभ्य
श्चोत्पादिभ्योद्व्यणुकादिगतानिरूपादीनि संभवंति॥ तंतुपटन्यायेनेति काणादामन्यंते॥

विनोनाशः परमाणूनां निरवयवत्वेनावयवविभागादेर्नाशहेतोरसंभवान्न नाशइत्यर्थः॥ तेषांनि
त्यत्वेफलितंसृष्टिक्रममाह॥ तत्रेति॥

एवंकाणादमतस्यमानमूलत्वात्तेनवेदांतसमन्वयस्यविरोधादसिद्धिरितिपूर्वपक्षफलंतत्पत्र्यांतिमूलत्व
द्विरोधइतिसिद्धांतयति॥ तत्रेदमिति॥ प्रलयेविभक्तानांपरमाणूनामन्यतरकर्मणोभयकर्मणावासंयोगो
वाच्यः॥ कर्मणश्चनिमित्तंप्रयत्नादिकंदृष्टं॥ यथाप्रयत्नवदात्मसंयोगादुहत्चेष्टा॥ नाद्याद्यपिघातादृक्षादिच
लने॥ हस्तोदनादिषुादिगमनंतद्वदणुकर्मणोदृष्टं निमित्तमभ्युपगम्यतेनवाहृतीयकर्मानुपपत्तिः॥ नाद्यः

तत्रेदमभिधीयेत॥ विभागावस्थानांतावदणूनांसंयोगः कर्मापेक्षोऽभ्युपगंतव्यः॥ कर्मवतांतं
तादीनांसंयोगदर्शनात्॥ कर्मणश्चकार्यतानिमित्तंकिमप्यभ्युपगंतव्यं॥ अनभ्युपगमेनिमि
त्तभावात्॥ नाणुष्वाद्यंकर्मस्यादभ्युपगमेपियदि प्रयत्नोपिघातादिर्वा॥

प्रयत्नादेःस्वोत्तरकालीनत्वादियुभययथापिनकर्मसंभवति॥ अतःकर्मासंभवात्तस्यसंयोग
पूर्वकद्व्यणुकादिसर्गस्याभावइतिसूत्रार्थः॥ स्थिरस्यवेगवत्द्रव्यसंयोगविशेषोऽभिघातः॥
सएवचलस्यनोदनमितिभेदः॥

दृष्टनिमित्ताभावेपिअदृष्टनदात्मसंयोगादणुषुकर्मेतिशंकते॥अथादृष्टमिति॥विकल्ल्यपुरःसरंदूष

अथादृष्टंकिमपिकर्मणोनिमित्तमभ्युपगम्येत॥तस्यासंभवात्॥नैवाणुष्वाद्यंकर्मस्यात्॥
नहितस्यामनस्कायामात्मगुणःप्रयत्नःसंभवतिशरीराभावाच्छरीरप्रतिषेधेहिमनस्या
त्मनःसंयोगःसत्यात्मगुणःप्रयत्नोजायते॥एतेनाभिघाताद्यपिदृष्टंनिमित्तंप्रत्याख्या
तव्यं॥सर्गोत्तरकालंहितत्सर्वंनाद्यस्यकर्मणोनिमित्तंसंभवत्यथादृष्टमाद्यस्यकर्मणो
निमित्तमित्युच्येत॥तत्पुनरात्मसमवायिवास्यादणुसमवायिवा॥

यति॥तत्पुनरिति॥जडात्मवदणोराश्रयत्वंकिंनस्यादितिमत्वाविकल्प्यःकुतइतिमंतव्यं॥॥

अत्रापिसूत्रंयोजयति॥उभयथेति॥जीवाधिष्ठितमदृष्टंनिमित्तमस्तियतआह॥आत्मनश्चेति॥अचेत
नत्वान्नाधिष्ठातृत्वमितिशेषः॥मिश्रेश्वरस्याधिष्ठातृत्वमग्रेनिराकरिष्यते॥अचेतनत्वमदृष्टस्यकर्म

उभयथापिनादृष्टंनिमित्तमणुकर्मविकल्प्येतादृष्टस्याचेतनत्वात्॥नह्यचेतनंचेतनेना
नधिष्ठितंस्वतंत्रंप्रवर्त्तितंप्रवर्त्तयतिचेतिसांख्यप्रक्रियायामभिहितं॥आत्मनश्चानुत्पन्न
चैतन्यस्यतस्यामनस्कायांअचेतनत्वात्॥आत्मसमवायित्वाभ्युपगमाच्च॥नादृष्टमणुषु
कर्मणोनिमित्तंस्यादसंबंधाददृष्टवतापुरुषेणात्यणूनांसंबंधइतिचेत्॥

निमित्तत्वाभावेहेतुरुक्तःहेत्वंतरमाह॥आत्मसमवायित्वेति॥गुरुत्वंनदृष्टमपित्वाश्रयप्रयुक्तेक्रि
याहेतुरितिशंकते॥अदृष्टवतेति॥

विभुसंयोगस्याणुषुसत्वात् क्रियासातत्येप्रलयाभावःस्यादितिदूषयति॥ संबंधेति॥ कदाचित्कप्रवृत्तेरदृष्टनियम्यतायोगेपीश्वरान्नियमइत्यतआह॥ नियामकांतरेति॥ यत्तूक्तंनंतघटरीत्यन्यमितिव्याप्तिविरोधेनानुमानासिद्धेस्तद्दूषणंश्वरेणास्ति॥ अस्तितेपिसदासत्वान्नियामकत्वमितिभावः॥ सूत्रार्थंनिग

संबंधसातत्यात्प्रवृत्तिसातत्यप्रसंगोनियामकांतराभावात्तदेवंनियतस्यकस्यचित्कर्मनिमित्तस्याभावात् नानुष्यायंकर्मस्यात्॥ कर्माभावात्तन्निबंधनःसंयोगोनस्यात्॥ संयोगाभावात्तन्निबंधंद्व्यणुकादिकार्यजातंनस्यात्॥ संयोगश्चाणोरण्वंतरेणसर्वात्मनानास्यादेकदेशेनवा॥ सर्वात्मनाचेदुपचयानुपपत्तेरणुमात्रत्वप्रसंगः॥

मयति॥ तदेवमिति॥ संयोगस्येतुत्वंखंडयित्वास्वरूपंखंडयति॥ संयोश्चाणोरिति॥ संयोगस्यव्याप्यवृत्तित्वेएकस्मिन्नितरस्यांतर्भावात्कार्यस्यपृथक्कायोगात्सर्वंकार्यंपरमाणुमात्रंस्यादित्यर्थः॥

किंच॥ सांशद्रव्येसंयोगस्यैकांशावृत्तित्वंदृष्टं॥ तद्विरोधाच्चाप्यवृत्तित्वंनकल्प्यमियाह॥ दृष्टेति॥ परमाणोःसंयोगएकदेशेनचेदितिसंबंधः॥ दिग्भेदेनकल्पितप्रदेशस्यसंयोगस्यापिकल्पितत्वात्तलःकार्यनो

दृष्टविपर्यप्रसंगात्॥ प्रदेशवतोद्रव्यस्यप्रदेशवद्द्रव्यांतरेणसंयोगस्यदृष्टत्वादेकदेशेनचेत्सावयवत्वप्रसंगः॥ परमाणूनांकल्पिताःप्रदेशाःसंतीतिचेत्॥ कल्पितानामवस्तुत्वात्॥ अवस्तुनेवसंयोगइतिनवस्तुनःकार्यंस्यात्समवायिकारणंनस्यात्॥ असतिचासमवायिकारणेद्व्यणुकादिकार्यद्रव्यंनोत्पद्येत॥

त्पद्येत॥ उत्पन्नंवामिथ्यास्यादित्यपसिद्धांतइत्यर्थः॥ कणादानांसर्गप्रत्युक्तौसूत्रंयोजयित्वाप्रलयनिरासेपिसूत्रंयोजयति॥

यथा चेति॥ परमाणूनां कर्मणा संयोगात्सर्गः विभागात्प्रलयइति प्रक्रियानयुक्ता॥ युगपदनंतरं परमाणूनां विभागे नियतस्यापि पूर्वादेर्दृष्टस्य निमित्तस्यासत्वात्॥ धर्माधर्मरूपासुरदुःखार्थेन सुरदुःखशून्यप्रलयप्र

यथाचादिसर्गे निमित्ताभावात्संयोगोत्पत्त्यर्थं कर्मणाणूनांसंभवति॥ एवंमहाप्रलयेपि विभागोपपत्त्यर्थं कर्मनैवाणूनांसंभवेत्॥ नहित्रापि किंचिन्नियतंतन्निमित्तंदृष्टं॥ अस्यदृष्टमपि भोगप्राप्त्यर्थेनप्रलयसिद्ध्यर्थं नियतो निमित्ताभावान्नस्यादणूनांसंयोगोपपत्त्यर्थं विभागोपपत्त्यर्थंवा कर्मतश्च संयोगविभागाभावात्तदायत्तयोः सर्गप्रलययोरभावः प्रसज्येत॥ तस्मादनुपपन्नोयंपरमाणुकारणवादः॥

योजनकत्वायोगान्नादृष्टनिमित्तेन कर्मणा विभागः संभवति॥ नथाचादृष्टादृष्टनिमित्तयोरसत्वादुभयथापि संयोगार्थेतेन विभागार्थेतेनचकर्मनास्ति॥ अतः कर्माभावात्॥ तयोः संयोगविभागपूर्वकयोः सर्गप्रलययोरभावइतिसूत्रे योजना॥

समवायाभ्युपगमाच्चतदभावः॥ अणुवादासंभवइतियोग्यतयासंबध्यते॥ द्व्यणुकसमवायेयोः परमाणुभि

समवायाभ्युपगमाच्चसाम्यादनवस्थितेः॥ समवायाभ्युपगमाच्चतदभावइतिप्रकृतेनाणुवादनिराकरणेनसंबध्यते॥ द्वाभ्यांचाणुभ्यांद्व्यणुकमुत्पद्यमानमवयवितद्भिन्नमणुभ्यामणोः समवैतीयभ्युपगम्यतेभवता॥ नचैवमभ्युपगच्छताशक्यतेऽणुकारणतासमर्थयितुं॥ कुतः साम्यादनवस्थितेः॥ यथैवद्व्यणुभ्यामवयवभिन्नंसद्व्यणुकंसमवायलक्षणेनसंबंधेनताभ्यांसंबध्यते॥ एवंसमवायोपिसमवायिभ्योऽवयवभिन्नः समवायलक्षणेनान्येनैवसंबंधेनसमवायिभिः संबध्येतात्यंतभेदसाम्यात्ततश्चैवतस्यसत्स्वान्योन्यसंबंधःकल्पयितव्यस्तत्रानवस्थाप्रसज्येत

नतसाम्याद्व्यणुकवत्समवायस्यापिसमवायांतरमियन्नवस्थितिरित्यर्थः॥

नन्विहतंतुषुपटइत्यादि विशिष्टधीर्नियामकः समवायोनसंबंधांतरमपेक्षते॥ स्वरूपेणैवनियतसंबंधत्वादि

नन्विहप्रत्ययग्राह्यः समवायोनियतसंबद्धएवसमवायिभिर्गृह्यतेनासंबद्धः संबंधांतरंापेक्षो वापिनतस्यान्यः संबंधः कल्पयितव्योयेनानवस्थाप्रसज्येतेति॥नेत्युच्यते॥संयोगोप्यनं सतिसंयोगिभिर्नियतसंबद्धएवेतिसमवायवन्नान्यंसंबंधमपेक्षेत॥अथार्थांतरत्वात्संयो गः संबंधांतरमपेक्षेत॥समवायपितर्ह्यर्थांतरत्वात्संबंधांतरमपेक्षेत॥नचगुणत्वात्संयोगः संबंधांतरमपेक्षतेनसमवायोऽगुणत्वादितियुज्यतेवक्तुं॥अपेक्षाकारणस्यतुल्यत्वात्॥

लिहांकृते॥नचेतेति॥संयोगस्यापिस्वरूपसंबंधोपपत्तेःसमवायोनस्यादितिदूषयति॥नेति संबंधिभिन्नत्वाच्चेदपेक्षासमवायस्यापितुल्या॥

गुणपरिभाषायाश्चेति॥गुणत्वाभावेपिकर्मसामान्यादीनांसमवायंगीकारागुणत्वंसमवायिते॥नव्यापकं॥नापिव्याप्यं गुणत्वापिसमवायेनस्वरूपसंबंधसंभवेनचाप्यनुकूलतर्कीभावात्तत्संबंधिभिन्नत्वमेवसंबंधांतरापेक्षायांकारणं यत्यसमवायेपितुल्यत्वादनवस्थादुर्वारासाचमूलक्षयकारीतयासमवायासिद्धौसमवेतद्व्यणुकासिद्धिरित्यर्थः॥सूत्रंचा

गुणपरिभाषायाश्चातंत्रत्वात्॥तस्मादर्थांतरंसमवायमभ्युपगच्छतःप्रसज्यतेनैवनवस्था॥प्रसज्यमानायांचानवस्था यामेकासिद्धौसर्वासिद्धेर्द्व्यणुकंनैवोत्पद्येत॥तस्मादप्यनुपपन्नःपरमाणुकारणवादः॥नियमेनचभा वात्॥अपिचाणवःप्रवृत्तिस्वभावानिवृत्तिस्वभावाउभयस्वभावावाउभयस्वभावाअभ्युपगम्यंते॥गत्यंतरा भावात्तच्चतुर्धापिनोपपद्यते॥प्रवृत्तिस्वभावत्वेनियमेनप्रवृत्तेर्भावात्सर्वदा भावप्रसंगः॥निवृत्तिस्वभावते पिनियमेननिवृत्तेर्भावात्सर्गाभावप्रसंगः॥उभयस्वभावत्वेचविरोधादसमंजसं॥अनुभयस्वभावत्वेतु निमित्तवशात्प्रवृत्तिनिवृत्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्यनियतेर्निधानान्नियतप्रवृत्तिप्रसंगादतं त्रेप्यदृष्टादेर्नियताप्रवृत्तिप्रसंगात्तस्मादप्यनुपपन्नःपरमाणुकारणवादः॥

चेष्टे॥अपिचेति॥अनुभयस्वभावत्वादुर्वारासाचमूलक्षयकारीतयासमवायासिद्धौसमवेतद्व्यणुकासिद्धिरित्यर्थः॥ नैमित्तप्रवृत्तिवार्त्तानिमित्तंचकालादेरदृष्टादिकंनियतसंनिहितमितिनियमेनप्रवृत्तिप्रसंगः॥तस्मान्निमित्तेप्रवृ

किंचपरमाणवः समवायिकारणवतः कारणापेक्षयास्थूलाअनित्याश्चरूपतादलतादृधनत्वात्यर्शवत्वात्घटवदितिस
त्रयोजयितुंपरप्रक्रियामाह॥ सावयवानामित्यादिना॥ नन्वत्रपरमाणुत्वपक्षतावच्छेदकत्वाद्दृस्थूलत्वंकथंसाध्यतेत्र
त्रिचेत्सनवायुत्वजेजस्त्वादेःपृथगवच्छेदकत्वान्नचात्रप्रयोजकताकारणशून्यतेनियतत्वात्मनद्रुपादिमत्वयोगान्न
रूपादिमत्वाच्चविपर्ययोदर्शनात्॥ सावयवानांद्रव्याणांमवयवशोविभज्यमानानांयतःपरोविभागोनसंभ
वति॥ तेचत्रिधारूपादिमतःपरमाणवश्चतुर्विधस्यरूपादिमतोभूतभौतिकस्यारंभकाःनित्याश्चेति॥ य
दैशेषिकाअभ्युपगच्छंति॥ सतेषामभ्युपगमोनिरालंबनएव॥ यतोरूपादिमत्वात्परमाणूनामणुत्वंनियत्वंविप
र्ययःप्रसज्येत॥ परमकारणापेक्षयास्थूलत्वमनियत्वंचतेषामभिप्रेतंविपरीतमापद्येतेत्यर्थः॥ कुतः एवं
लोकेदृष्टत्वात्॥ यद्धिलोकेरूपादिमद्वस्तुतत्स्वकारणापेक्षयास्थूलमनित्यंचदृष्टं॥ तद्यथा॥ पटस्तंतुनपेक्ष्य
स्थूलोऽनित्यश्चभवति॥ तंतवश्चांशूनपेक्ष्यस्थूलाअनित्याश्चभवंति॥ तथाचामीपरमाणवोरूपादिमंतस्तैरभ्यु
पगम्यंते॥ तस्मात्तेपिकारणवंतस्तदपेक्षयास्थूलाअनित्याश्चप्राप्नुवंति॥

चतर्हिवायुःकारणवानितिपृथक्त्वावच्छेदकतान्नचात्रप्रयोजकताशून्यत्वेनसाधनेरूपादिहेतूनांभागासिध्यभा
वेसिद्धसाधनतास्यादितिवाच्यं॥ यत्रस्पर्शस्तत्सकारणंयत्ररूपंनतत्सकारणमितिव्याप्तिग्रहकालेवायुत्वावच्छे
दकेनसाध्यसिध्यभावादितिभावः॥

परमाणवोनित्याःसतेसत्यकारणवतादात्मवदितिसत्प्रतिपक्षमुत्थाप्यनिरोष्यासिद्धत्वादूषयति॥ यत्रनियतत्व
ति॥ सतंभवतेप्रागभावनिरासार्थंनियतप्रतिषेधःसप्रतियोगिकःअभावत्वात्घटाभाववदितिनियतस्यकृ
त्रिमस्यैवकार्यमनित्यमितिविशेषतःकार्यनियतप्रतिषेधात्कारणभूतपरमाणुषुनियतंसिध्यति॥ अन्यथाप्रति
योग्यभावेप्रतिषेधानुपपत्तिरितिकरणादुक्तमनूद्यान्यथासिध्यादूषयति॥ यदपीति॥ कार्यनियतप्रतिषेध
यत्रनियतेकारणंतत्तत्सदकारणवन्नित्यमिति॥ तदप्येवंसत्यणुष्वसंभवति॥ उक्तेनप्रकारेणअणू
नामपिकारणतोपपद्यतेः॥ यदपिनियतेद्वितीयंकारणंउक्तमनित्यमितिचविशेषतःप्रतिषेधाभावद्
ति॥ तदपिनाऽऽश्रयंपरमाणूनांनियतंसाधयतिहियस्मिन्नसिध्तन्नियतंवस्तुनिनियतेनसंभ
समासोनोपपद्यते॥ नपुनःपरमाणुनियतमेवापेक्ष्यते॥ तत्रास्मेवनित्यपरमकारणंब्रूम॥ नचशब्दार्थय
कारमात्रेणनस्थित्यर्थस्यप्रसिद्धिर्भवति॥ प्रमाणांतरसिद्धयोःशब्दार्थयोर्व्यवहारावतारात्॥

व्यवहारमंगीकृत्यब्रह्मणिप्रतियोगिप्रसिद्धित्वाच्चस्तुनस्तुविशेषव्यवहारएवासिद्धःकारणंनियतस्यप्रमाणांतरे
णज्ञानेविनाकार्यमनित्यमितिव्यवहारायोगादित्याह॥ नचशब्देति॥ यदिप्रमाणांतरंकारणंनियतंस्यात्तदाव्यवहार
समूलोभवति॥ ततोमूलज्ञानात्प्राग्व्यवहारमात्रेणवस्तुसिद्धिः॥ नैवंयथाव्यवहारादपितत्सिद्धिप्रसंगात्मूलज्ञा
नेतुतेनैवनिरोषसिद्धेर्व्यवहारोपन्यासेनैवार्थसिद्धिरितिभावः॥

एवं परमाणुनित्यते काणादसूत्रद्वयं निरस्य तृतीयं निरस्यति॥ यदपीति॥ सतामणूनांदृश्यमानस्थूलकार्याणांप्रत्यक्षेण कारणाज्ञानमविद्येति यदिसूत्रार्थस्तर्ह्यप्रत्यक्षकारणत्वं॥ नित्यतेहेतुः स्यात्तन्नाद्यणुकेऽपि चारादिदमर्थः॥ यद्यारंभकद्रव्यशून्यत्वं हेतुर्न शैषणत्वं तदा निरोष्यवैयर्थ्यमापद्येत। पुनरुक्तिश्चेत्याह॥ अथेत्या यदपि नित्यतेतृतीयकारणमुक्तमविद्याचेतिलघ्वेवं निर्वीयेतसतांपरिदृश्यमानकार्याणांकारणांप्रत्यक्षेणाग्रहणमविद्येति।ततोद्यणुकंनित्यतापद्येत॥ अथाद्रव्यंतत्सतीतिनिरोष्येत तथाप्यकारणवत्त्वमेवनित्यतानिमित्तमापद्येत॥ तस्यचप्रागेवोक्तत्वात्॥ अविद्याचेतिपुनरुक्तं स्यात्॥ अथापिकारणविभागात्कारणविनाशाच्चान्यस्यतृतीयस्यविनाशहेतोस्संभवोऽविद्यासापरमाणूनांनित्यतांव्यापयतीतिव्याख्यायेत॥

दिना॥ परमाणवोनित्याः नाशकानुपलंभादात्मवदितिसूत्रार्थमाशंकते॥ अथापीति॥ तंत्राद्यवयवनाशविभागान्नाशाद्घटादिनाशोदृष्टः॥ तच्चद्वयंनिरवयवाणूनांनास्तीतिनित्यत्वमित्यर्थः॥

परिणामवादमाश्रित्याद्यणूनांनाशंकिंचित्संभवतीतिपरिहरति॥ नेति॥ अवयवनानासंयोगेनद्रव्यांतरोत्पत्तिरारंभइतियदिमतंत्रात्तदाद्रव्यविनाशोद्वाभ्यामेवेतिनियमःस्यात्परेषामानमस्ति संयुक्तंतंत्रव्यपदेशनिदानंकारणमेवस्यतोनिर्विशेषनिरोषवदवस्थात्मनाकार्योत्पत्तावप्रकल्पतेदवस्थेयंतथाचाणूनामपिविद्यापरिणामरूपाणांप्रलयनिमित्तेनकालादिनापिंडात्मकस्वरूपोत्तरभावनारणाभावापत्तिर्विनाशोपपद्यते॥ यथाग्निसंपर्कात्घृतकाठिन्यमवयवसंयोगस्यावयवानांनाशंविनैवलीयतेतद्वत्प्रकृतेकाठिन्यनाशस्यविनाशद्वस्तुद्वाभ्यामेवहेतुभ्यांविनाशमर्हतीतिनियमोस्ति॥ संयोगसंज्ञेनदिअन्येनकस्मिंश्चद्रव्येद्रव्यस्यारंभेऽप्युपगम्यमानेतदेवंस्यात्॥ यदात्वपास्तोविरोधसामान्यात्मकंकारणंनिरोषवदवस्थांतरमापद्यमानमारंभकमप्युपगम्यतेतदाघृतकाठिन्यविलयननन्मूर्तिस्थाविलयनेनापिविनाशोपपद्यते॥ तस्माद्रूपादिमत्वात्स्यादपिप्रेतविपर्ययःपरमाणूनां॥

स्यसंयोगनिरोषतेनगुणत्वाद्द्रव्यनाशेऽनुदाहरणमेवमितिशंकां॥ गुणवद्द्रव्यस्यापिकुतश्चिद्विनाशदर्शनोत्तरणादुणपरिभाषायाश्चातंत्रत्वाद्वस्तुतस्तुघनंकाठिन्यद्रव्यमित्यनुस्युतद्घृतपरिणामनिरोषोद्रव्यमेवकाठिन्यं॥ ननुद्रवतेपिउदकस्यनविभागादवयवनाशादितिवाच्यं॥ घृतस्यपरिणामिनएकत्वेनविभागासंभवात्परमाणुकाठिन्यनाशेनदसंभवान्नेतिभावः॥ आरब्धयधिकरणरीत्याद्यघृतस्यापिद्रव्यरूपतरणापत्तिः॥ ननुवेदांतिसमतसूक्ष्मभूतेष्वेवनादितमात्रंनत्वन्नेलाघवात्मास्तुविद्येतिचेत्नश्रुतिसिद्धाविद्यांगीकारस्यवश्यकत्वेनतस्याएकत्वेनचास्माकमेवलाघवात्॥

किंच प्रलयेनालीढ्जोनान्यद्विचनेयणूनांनानात्वसिद्धिस्तस्मान्नतेषांपरमकारणत्वमित्युपसंहरति॥तस्मादिति॥यद्यस्मा
दधिकगुणस्त्वत्तस्मात्स्थूलोमतिर्यापिमुक्तोविकल्प्यते॥तद्वदिति॥पार्थिवःपरमाणुःअधिकगुणस्तत एकैकन्यून
तस्मादप्यनुपपन्नःपरमाणुकारणवादः॥उभयथाचदोषात्॥गंधरसरूपस्पर्शगुणास्थूलापृथिवी॥रूपरस
स्पर्शगुणाःसूक्ष्माआपःरूपस्पर्शगुणंसूक्ष्मतरंतेजःस्पर्शगुणःसूक्ष्मोवायुरिति॥एवमेतानिचतारिभू
तानिउपचितापचितगुणानिस्थूलसूक्ष्मतारतम्योपलानिचलोकलक्ष्यंते॥तद्वत्परमाणवोऽप्युपचिता
पचितगुणाःकल्प्यरन्नवा॥उभयथापिचदोषानुषंगोऽपरिहार्यएवस्यात्॥कल्प्यमानेतावदुपचितापच
चितगुणतेषुपचितगुणानांमूर्त्युपचयादपरमाणुत्वप्रसंगः॥नचांतरेणापिमूर्त्युपचयंगुणोपचयो
भवतीत्युच्यते॥कार्येषुभूतेषुगुणोपचयेमूर्त्युपचयदर्शनात्॥

गुणजलादिपरमाणवइतिकल्प्यतेनवा आद्येदोषमाह॥कल्प्यमानाइति॥मूर्त्युपचयात्॥स्योत्यादियथैः॥
पार्थिवोऽणुरापास्थूलःअधिकगुणतात्घटवदित्येवंप्रयोक्तव्यःअप्रयोजकत्वंनिरस्यति॥नचांतरेणापि
दृष्टविरोधःस्यादितिभावः॥

॥३०॥

नेतिपक्षेसर्वेषांअणूनांसाम्यार्थमेकैकगुणवत्वंवास्याच्चतुर्गुणवत्वंवा॥उभयथापिदोषमाह॥अकल्प्यमाने
अकल्प्यमानेतुउपचितापचितगुणतेपरमाणुत्वसाम्यप्रसिद्ध्येयदितावत्सर्वएकैकगुणाएवकल्प्यो
रन्॥ततस्तेजसिस्पर्शस्योपलब्धिर्नस्यात्॥उपसृष्टरूपस्पर्शयोःपृथिव्यांरसरूपस्पर्शानांका
रणगुणपूर्वकत्वात्कार्यगुणानां॥अथसर्वेचतुर्गुणाएवकल्प्येरन्॥ततोऽप्सुपिगंधस्योपलब्धिः
स्यात्तेजसिगंधरसयोर्वायौगंधरूपरसानां॥नचैवंदृश्यते॥तस्मादप्यनुपपन्नःपरमाणुकार
णवादः॥अपरिग्रहाच्चायंतमनपेक्षा॥प्रधानकारणवादोवेदविद्भिरपिकैश्चिन्मन्वादिभिःस
त्कार्यतात्पर्येणोपजीवनाभिप्रायेणोपनिबद्धः॥अयंतुपरमाणुकारणवादोनकैश्चिदपिशिष्टैःकेन
चिदप्यंशेनपरिगृहीतइत्ययंतमेवानादरणीयोवेदवादिभिः॥

तिसादिना॥नकेनलमणुवादस्यायुक्ततादुपेक्षा॥किंतुशिष्टवहिष्कृततात्॥ग्रंथतोऽर्थतश्चायाह्यतमित्या
ह॥अपरिग्रहाच्चेति॥

चकारार्थमपंचसिलुमुपक्रमते॥अपिचेति॥अयंतभेदज्ञापकमाह॥भिन्नलक्षणानिति॥द्रव्यगुणक
र्मणांद्रव्यत्वगुणत्वकर्मत्वजातयोऽकृतंवास्यात्॥चतुर्गुणकलक्षणानिगुणाश्रयत्वाद्युपाधयोनानि

अपिचवैशेषिकाःतंत्रार्थभूतान्षट्पदार्थान्द्रव्यगुणकर्मसामान्यविशेषसमवा
यास्यानयंतभिन्नान्॥भिन्नलक्षणानभ्युपगच्छंति॥यथामनुष्योऽश्वःशशाइति॥

गुणेतस्तिज्ञातिमदक्रियातंगुणलक्षणंसंयोगविभागयोर्निरपेक्षकारणंकर्मनित्यमेकमने
कसमवेतंसामान्यंनित्यद्रव्यवृत्तयोविशेषाःनित्यसंबंधसमवायःइतिभिन्नालक्षणानि
।तैर्भिन्नोऽयंतभेदसिद्धिरित्यर्थः॥

तथातमयंताभिन्नतं॥तेनतस्माद्योधर्मधर्मिभावःगुणादयोनद्रव्यधर्माःस्युः॥ततोयंताभिन्नता
च्छशकुशादिवदित्यर्थः॥भेदेबाधकमुपन्यस्याभेदमाह॥अथभवतीति॥गुणादिषुतदधीनतंतावद

तथातंचाभ्युपगम्यतद्विद्रव्याधीनतंशेषाणामभ्युपगच्छंति॥तन्नोपपद्यते॥कथं॥
यथाहिलोकेशशकुशरोमशप्रभृतीनोमयंताभिन्नानोतंनेतरेतराधीनतंभवति॥ए
वंद्रव्यादीनामयंताभिन्नतान्नैवद्रव्याधीनतंगुणादीनांभवितुमर्हति॥अथभवतिद्रव्या
धीनतंगुणादीनांततोद्रव्याभावेभावात्तद्रव्याभावेभावात्॥

न्वयव्यतिरेकसिद्धं॥तथाचगुणादयोद्रव्याभिन्नाः द्रव्याधीनत्वात्॥यद्यस्मात्भिन्नंतन्न
तदधीनं॥यथाशशाभिन्नःकुशइत्यर्थः॥

अभेदेद्रव्यंगुणइतिशाब्दप्रत्ययभेदःकथंतत्राह॥द्रव्यमितिः॥कल्पितभेदोप्यस्तीत्याशङ्क्याहः॥अन्यथायंत
भेदनदत्यंताभेदेपिधर्मितायोगादितिमंतव्यं॥अस्तुगुणादीनांद्रव्यतादात्म्यमितिचेदंतर्किकंमन्यंप्र

द्रव्यमेवसंस्थानादिभेदादनेकशाब्दप्रत्ययभाग्भवति॥यथादेवदत्तएकएवसन्नवस्था
तरयोगादनेकशाब्दप्रत्ययभाग्भवति॥तद्वत्॥तथासतिसांख्यसिद्धांतप्रसंगः॥स्व
सिद्धांतविरोधश्चापद्येतां॥नन्वग्नेरन्यस्यापिधूमस्याग्र्यधीनतादृश्यते॥

त्याह॥तथासतीति॥सांख्योऽत्रेदातीत्याद्यः॥यद्वाकापिलस्यापितादात्म्यसिद्धांतरतिसं
त्यागहणं॥यद्यपितदधीनतंतद्धर्मतंतन्नधूमेनास्ति॥अग्निंविनापिभावात्तथापितत्कार्य
तंतदधीनतंमताव्यभिचारशंकते॥नन्विति॥

किंचभोक्तुःक्षणिकत्वपक्षेभोगापवर्गव्यवहारोपिदुर्घटइत्याह॥अपिचेति॥योयदिच्छतितत्कालेनास्तिचे

अपिचयद्भोगार्थःसंघातःस्यात्सनास्तिस्थिरोभोक्तेतितवाभ्युपगमः॥ततश्चभोगोभोगा
र्थएवसनान्येनप्रार्थनीयः॥तथामोक्षमोक्षार्थएवेतिमुमुक्षुणाऽन्येनभवितव्यं॥अ
न्येनचेत्प्रार्थ्येतोभयंभोगमोक्षकालावस्थायिनातेनभवितव्यं॥अवस्थायितेक्षणि
कत्वाभ्युपगमविरोधः॥तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनांयदिभवेत्॥
भवतुनामनतुसंघातःसिध्येत्॥भोक्त्रभावादित्यभिप्रायः॥ ॥ ॥ ॥

दिच्छार्थाअस्तिचेत्क्षणिकत्वभंगइत्यर्थः॥प्रकृतंसंघातनिरासमुपसंहरति॥तस्मादिति॥

PAGE(S) MISSING
NOT AVAILABLE

FOLIO NOS.
33 - 43

पृथिव्यादिपंचभूतानि रूपादयश्चेति कारणसमुदायो रूपादिकार्यं
द्विविधो हि कार्यसमुत्पादः सुगतसंमतः हेत्वधीनः कारणसमुदायाधीनश्चेति ॥ तत्राविघातः संस्कारस्ततो वि
ज्ञानमित्येवंरूपः प्रथमः पृथिव्यादिसमुदायात्कायस्येवं द्वितीयः ॥ तत्र यदंगीकृत्य द्वितीयः संघात कर्त्रभा

उत्तरोत्पादेचपूर्वनिरोधात् ॥ उक्तमेतदविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्नसंघातसिद्धि
रस्तीति ॥ तदपि तूत्पत्तिमात्रनिमित्ततंनसंभवतीतिइदमिदानीमुपपद्यते ॥ क्षणभंगवा
दोयमभ्युपगमः ॥ उत्तरस्मिन्क्षणेउत्पद्यमानेपूर्वःक्षणोनिरुध्यतइति ॥ नचैवमभ्यु
पगच्छतःपूर्वोत्तरयोःक्षणयोःहेतुफलभावःशक्यतेसंपादयितुं ॥ निरुध्यमानस्यनिरुध
स्यवापूर्वक्षणस्याभावग्रस्तत्वात्उत्तरक्षणहेतुत्वानुपपत्तेः ॥ ॥ ॥ ॥

वनदूषितः ॥ संप्रत्यायंदूषयतिसूत्रकारः उत्तरेतिक्षणिकोर्थःक्षणइत्युच्यते ॥ निरुध्यमानतंविना
शकसान्निध्येनिरुद्धेनसतीतत्तं ॥ ॥

॥४४॥

ननुकार्यकालेविनाशव्यापृतेपिपूर्वक्षणेसत्क्षणिकार्थस्यहेतुत्वमक्षतमितिशंकते ॥ अथभावेति ॥ सदूपस्यार्थः
किंहेतोरुत्पत्तिरिति ॥ तत्कार्योत्पादनेव्यापारःअनतिरिक्तोवानाद्यइत्युक्तादितीयंशंकते ॥ अथेति ॥ भावःउत्पत्ति
उक्तोहि ॥ भूतिर्येषांक्रियासैवकारकंसैवचोच्यतइति ॥ येषांक्षणिकभावानांयाभूतिःसैवक्रियाकारकंचेत्यर्थः ॥ नन्

अथभावभूतःपरिनिष्पन्नावस्थःपूर्वक्षणउत्तरक्षणस्यहेतुरित्यपिप्रायस्तथापिनोपपद्यते
भावभूतस्यपुनर्व्यापारकल्पनायांक्षणांतरसंबंधप्रसंगात् ॥ अथभावएवास्यव्यापारइत्य
पिप्रायः तथापिनैवोपपद्यते ॥ हेतुस्वभावानुपरक्तस्यफलस्योत्पत्तिसंभवात् ॥ स्वभावोप

रागाभ्युपगमेचहेतुस्वभावस्यफलकालावस्थायितेसतिक्षणभंगाभ्युपगमरागप्रसंगः
विनैवास्वभावोपरागेणहेतुफलभावमभ्युपगच्छतःसर्वत्रतत्प्राप्तेरतिप्रसंगः ॥ अपिचो
त्पादनिरोधोनामवस्तुनःस्वरूपमेवनास्यातांअवस्थांतरंवास्तंतरमेवनासर्वथापिनोपपद्य
ते ॥ यदितावद्वस्तुनःस्वरूपमेवोत्पादनिरोधोस्यातां ॥ ततोवस्तुशब्दउत्पादनिरोधशब्दोचपर्यी

नष्टस्यापिनिमित्तत्वंस्यान्नोपादानत्वं ॥ तथाचमृदोदंडाद्यवस्थाकालासंबंधायघटनुत्पत्तिः संबंधेचक्षणिकत्वहानिरिति
वरहरति ॥ तथापीत्यादिना ॥ प्रथमपक्षोक्तदोषंदर्शयति ॥ विनैवेति ॥ वस्तुनोजन्मध्वंसानिरूपणाच्चक्षणिकत्व

या: स्युः ॥

तयोः स्वरूपे वस्तुन्यंतर्भावात् वस्तुनोऽनाद्यनंतलक्षितयापि दृष्टव्यं॥ द्वितीयं शंकते॥ अथास्तीति॥ विशेषमेवाह॥ उत्पद्यते इति॥ दूषयति॥ एवमपीति॥ ताभ्यां संसर्गे वस्तुनः क्षणिकत्वे भंगः स्यात् संसर्ग एवनास्तीति तृतीयं कल्पमुत्थाप्य दूषयति॥ अथायं तेति॥ सूत्रं व्याख्याति॥ तत्संस्मारयति॥ क्षणभंगेति॥ किं कार्योत्पत्तिर्निर्हेतुका वा आद्ये प्रतिज्ञाहानिरिति

अथास्तिकश्चिद्दोषइतिमन्येतोत्पादनिरोधशब्दाभ्यां मध्यवर्तिनो वस्तुनः आद्यंतावस्थे अभिलप्येतेइति॥ एवमप्यंतन्मध्यक्षणत्रयसंबंधिलाद्वस्तुनः क्षणिकत्वाप्युपगमहानिः॥ अथायंतव्यतिरिक्तौ वैनोत्पादनिरोधौ वस्तुनः स्यातां॥ अश्वमहिषवत् ततो वस्तूत्पादनिरोधाभ्यामसंस्पृष्टमिति वस्तुनः शाश्वतत्वप्रसंगएव॥ तस्मादप्यसंगतंसोगतंमतं॥ असतिप्रतिज्ञोपरोधो योगपद्यमन्यथा॥ क्षणभंगवादेपूर्वक्षणो निरोधग्रस्तत्वान्नोत्तरस्यक्षणस्यहेतुर्भवतीसुक्तं अथासतोपहेतोरपि फलोत्पत्तिं ब्रूयात्॥ ततः प्रतिज्ञोपरोधः स्यात्॥ चतुर्विधान्हेतून्त्रलीयचित्तचैत्ताउत्पद्यंतइतीयंप्रतिज्ञाहीयेत॥

त॥ अथासतोपहेतोरादिना॥ विषयेंद्रियसहकारिसंस्काराश्चतुर्विधाहेतवस्तान्प्रतीत्यप्राप्यचित्तरूपादिचित्तानं चैत्ताश्चितात्मकाः सुखादयश्चजायंतइतिप्रतिज्ञार्थः॥ यथा चित्तानीलं वस्त्वालंबनप्रत्ययो विषय॥ चक्षुरिंद्रियं करणमधिपतिप्रत्ययः॥ सहकारिप्रत्ययआलोकः समनंतरपूर्वप्रत्ययः संस्कारइति भेदः॥ ॥ ॥ ॥ ॥

॥४५॥

प्रतिज्ञाहानिं पुरुषदोषमुक्त्वास्तु दोषमप्याह॥ निर्हेतुकायांचेति॥ सहेतुकत्वपक्षेऽन्वयीकारणस्यसद्भावः कार्यसद्भावापत्त्याक्षणिकत्वप्रतिज्ञाहानिरितिसूत्रशेषं व्याचष्टे॥ अथोत्तरेक्षणेत्यादिना॥ सम्यक्त्रियंतइतिसंस्काराः॥ अनंतरंतो भावाइत्यर्थः॥ एवमाद्यसूत्राभ्यां समुदायोनिरस्तः॥ उत्तरसूत्राभ्यां कार्यकारणभावक्षणिकत्वेनिरस्तेसंप्रतितदभिमतंद्वितीयं विनाशंदूषयति॥ प्रतिसंख्येति॥ संस्कृतमुत्पाद्यबुद्धिबोध्यंत्रयमेयमात्रंत्रयात्तुच्छरूपादन्यदित्यर्थः॥

निर्हेतुकाभ्यांचोभयतावप्रतिबंधात्सर्वंसर्वत्रोत्पद्येत॥ अथोत्तरक्षणोत्पत्तियावदवतिष्ठते॥ पूर्वक्षणइतिब्रूयात्॥ ततोयोगपद्यंहेतुफलयोः स्यात्॥ तथापिप्रतिज्ञोपरोधएवस्यात्॥ क्षणिकाः सर्वेसंस्काराइतीयंप्रतिज्ञोपरुध्येत्॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥ अपिचैवनाशिनाः कृत्वायंतिबुद्धिबोध्यंत्रयादन्यत्संस्कृतंक्षणिकंचेति॥ तदपिचत्रयंप्रतिसंख्याऽप्रतिसंख्यानिरोधाकाशांचेयाचक्षते॥ त्रयमपिचैतदवस्तुभावमात्रं निरुपाख्यमितिमन्यते॥ बुद्धिपूर्वकः किल विनाशो भावानां प्रतिसंख्यानिरोधो नाम भाष्यते॥ तद्विपरीतोऽप्रतिसंख्यानिरोधः आवरणमात्रमाकाशमिति॥ ॥ ॥

किंतत्त्रयंतदाह॥ तदपीति॥ निरुपाख्यं निःस्वरूपं प्रतिसंख्यातयानिरोधः॥ कस्यचिद्भावस्यभवति अबुद्धिपूर्वकस्तु संस्कारादीनांस्वरसभंगुराणामित्याह॥ निष्पीडनेति॥

निरन्वयविनाशमात्रं

परप्रक्रियामुद्भाव्य सूत्रं व्याचष्टे ॥ तेषामिति ॥ भावाः संतानिनः संतानो नाम भावानां हेतुफलभावेन प्रवाहस्तस्मिन् संतानिचरमक्षणः क्षणांतरं करोति नान्यथा ॥ अन्यथा चरमत्वव्याघातः संतानो विच्छेदात् ॥ द्वितीयपक्षे चरमस्यासत्प्रसंगः ॥ अर्थक्रियाकारित्वं सत्त्वमिति तत्सिद्धांताच्चरमस्यासत्त्वे पूर्वेषामप्यसत्त्वप्रसंगः ॥

तेषामाकाशंपरस्मात्प्रयोगाख्यास्यति निरोधद्वयमिदानीं प्रत्याचष्टे ॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधयोरप्राप्तिरसंभवस्तदर्थः ॥ कस्मादविच्छेदात् ॥ एतौ हि प्रतिसंख्याऽप्रतिसंख्यानिरोधौ संतानगोचरौ नास्यातां ॥ भावगोचरौ वा न तावत्संतानगोचरौ संभवतः ॥ सर्वेष्वपि संतानेषु संतानिनामविच्छिन्नेन हेतुफलभावेन संतानविच्छेदस्यासंभवात् ॥ नापि भावगोचरौ संभवतः ॥ न हि भावानां निरन्वयो निरुपाख्यो विनाशः संभवति ॥ सर्वो हि स्वयमस्य सुप्रयुक्तानवस्थेनान्वयविच्छेददर्शनात् ॥

अर्थक्रियाशून्यत्वात् ॥ तस्मात्संतानस्य विच्छेदासंभवात् निरोधाप्राप्तिरिष्यते ॥ न तावदिति ॥ द्वितीयमाह ॥ नापीति ॥ घटकपालचूर्णादिवस्त्वासु सेयं मृदिति प्रत्यभिज्ञानादन्वयिभावस्य मृदादेर्नित्यंतिरूपविनाशदर्शनात् ॥

॥४६॥

वा नित्यं कुशूलादिषु प्रत्यभिज्ञानादर्शनादन्वयेनो विच्छेददर्शनतश्च ॥ अस्येति ॥ अंकुरादयोऽनित्यतान्वयिभावस्याः कार्यलक्षणदिव्यन्वयविच्छेदसिद्धिरित्यर्थः ॥ यस्माद्भावानां स्थायित्वं तस्मात्प्रतिक्षणनिरोधासंभवइत्युपसंहारः ॥ अविद्यादीनामप्यस्थैर्यप्रत्यभिज्ञानात्क्वाप्यवस्थासु क्वचिद्दृष्टेनान्वयविच्छेदेनान्वयापितदनुमानात् ॥ तस्मात्परपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः ॥ उभयथा च दोषात् ॥ योयमविद्यादिनिरोधः प्रतिसंख्याप्रतिसंख्यानिरोधौ तावुपात्तौ परपरिकल्पितः सम्यग्ज्ञानाद्वासपरिक्षयात्स्वयमेव वा ॥ पूर्वस्मिन्पक्षत्रये निर्हेतुत्वविनाशाभ्युपगमतानिप्रसंगः ॥ उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसंगः ॥ एवमुभयथापि दोषप्रसंगादसमंजसमिदं दर्शनं ॥ आकाशेनाविरोधात् ॥ यच्च तेषामेनाभिप्रेतं निरोधद्वयमाकाशं चानुपाख्यमिति ॥ तत्र निरोधद्वयस्यानुपाख्यत्वं पुरस्तान्निराकृतं ॥ आकाशस्येदानीं निराक्रियते ॥ आकाशोनाद्युक्तो निरुपाख्यतेत्यभ्युपगमः ॥ प्रतिसंख्याप्रतिसंख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविरोधात् ॥ आगमप्रामाण्यात्तावदात्मनआकाशः संभूत इत्यादिश्रुतिभ्य आकाशस्य च वस्तुत्वप्रसिद्धेः ॥

तिसंख्यानिरोधं तदभिमतं दूषयति ॥ उभयथेति ॥ यमनियमादयः परिकराः सर्वेषु क्षणिकेष्विति भावनोपदेशो मार्गोपदेशः ॥ आगमप्रामाण्यादिति तन्नाकाशस्य कार्यलक्षणघटादिवद्वस्तुत्वं प्रसिध्यतीत्यर्थः ॥

एवं भावनोपदेशोत्तरं भावनयाऽविद्यादीनां नाशादिति तन्नाशस्य बुद्धिपूर्वकत्वं ॥

नन्वागमप्रामाण्येनिप्रतिपन्नान्सुगतान्प्रत्याकाशस्यावस्तुत्वंकथंसिध्यतीत्यतआह॥निप्रतिपन्नानिति॥शब्दोवस्तुनिष्ठःगुणत्वंधादित्यनुमादाकाशस्यवस्तुत्वंसिध्यति॥पृथिव्याद्यषड्द्रव्याणांश्रोत्रग्राह्यगुणाश्रयत्वायोगादित्यर्थः॥आकाशस्यभावत्वंसाध्याभावत्वंदूषयति॥अपिच॥यथैकघटसंबंधेपिघटसामान्याभावोनास्तितथैकरूपक्षिप्तेपिमूर्त्तद्रव्यसामान्याभावात्मात्माकाशोनास्त्वेतिपक्षेंतरसंचारोनस्यादित्यर्थः॥देशनिरोधावच्छेदेनावरणाभावोनास्तीत्याशंक्याभावावच्छेदकदेशनिरोषएवाकाशोनाभावनिप्रतिपन्नान्प्रतितुशब्दगुणानुमेयत्वंवक्तव्यंगंधादीनांगुणानांपृथिव्यादिवद्वस्त्वाश्रयत्वदर्शनात्॥अपिचावरणाभावमात्रमाकाशमिच्छतांएकस्मिन्सुपर्णेपतत्याऽऽवरणस्यविद्यमानत्वात्सुपर्णांतरस्योत्पित्सतोऽनवकाशप्रसंगः॥यत्रावरणाभावःतत्रपतिष्यतीतिचेत्॥येनावरणाभावोनिरोष्यतेतन्नहिवस्तुभूतमेवाकाशंस्यान्नावरणाभावमात्रं॥अपिचावरणाभावमात्रमाकाशमन्यमानस्यसौगतस्यस्वाभ्युपगमविरोधःप्रसज्यते॥सौगतेहिसमयेपृथिवीभगवःकिंसंनिश्रयेयस्मिन्प्रश्नप्रतिवचनप्रवृत्तेपृथिव्यादिनामंतेवायुःकिंसन्निश्रयइत्यस्यप्रश्नस्यप्रतिवचनंभवतिवायुराकाशसन्निश्रयइति॥तदाकाशस्यवस्तुत्वे॥नसमंजसंस्यात्॥तस्मादप्ययुक्तमाकाशस्यावस्तुत्वं॥

वदसाह॥तत्रेत्यादिना॥पतिष्यतिपक्षीसंचरिष्यतीत्यर्थः॥आकाशस्यावस्तुत्वंस्वग्रंथविरुद्धंचेत्याह॥अपिचेति॥किंसम्यक्निश्रयआश्रयोस्यादितिकिंसन्निश्रयआवस्तुनःशशविषाणस्याश्रयत्वादर्शनादितिभावः॥ ॥ ॥ ॥ ॥

बाधांतरमाह॥अपिचेति॥ध्वंसाप्रतियोगितारूपोधर्मोनियतंनासतिसंभवतिधर्मिणोऽसत्त्वापातादित्यर्थः॥आकाश

अपिचनिरोधद्वयमाकाशंत्रयमप्येतन्निरूपाख्यमवस्तु॥निसंचेतिनिप्रतिषेधे॥नह्यवस्तुनोनियतंनियतेनासंभवति॥वस्त्वाश्रयत्वात्॥धर्मधर्मिव्यवहारस्यधर्मधर्मिभावेहिघटादिवस्तुनमेवस्यान्नानिरूपाख्यत्वं॥अनुस्मृतेश्च॥अपिचवैनाशिकःसर्वस्यवस्तुनःक्षणिकतामभ्युपयन्नुपलब्धेरपिक्षणिकतामभ्युपेयात्॥नचसासंभवति॥अनुस्मृतेःअनुभवमुपलब्धिमनूत्पद्यमानंस्मरणमेवानुस्मृतिः॥साचोपलब्धेरकर्तृकासतीसंभवति॥पुरुषांतरोपलब्धिविषयेपुरुषांतरस्यस्मृत्यदर्शनात्॥ ॥ ॥ ॥ ॥ ॥

नःक्षणिकतंदूषयति॥अनुस्मृतेरिति॥अनुभवजन्यास्मृतिरनुस्मृतिस्तस्याअनुभवसमानाश्रयत्वात्तदुभयाश्रयात्मनःस्थायित्वमित्यर्थः॥

क्षणिकत्वेऽनुसंधानंचनस्यादित्याह ॥ कथंह्यहमिति॥ पूर्वदर्शनकर्त्तुरद्राक्षमितिस्मरणकर्त्तैक्यप्रत्यभि
ज्ञानाज्ज्ञात्मनःस्थायित्वेमियाह॥ अपिचेति॥ योहमदःपूर्वमद्राक्षंसएवाहमद्यतत्स्मरामीतिप्रत्यभिज्ञानाकारोद्रष्टृ

कथंह्यहमदोऽद्राक्षमिदंपश्यामीतिचपूर्वोत्तरदर्शिन्येकस्मिन्नप्रतिप्रत्ययःस्यात्॥ अपिच ॥ दर्शन स्म
रणयोःकर्त्तृभेदेकस्मिन्प्रत्ययःप्रत्यभिज्ञाप्रत्ययःसर्वस्यलोकस्यप्रसिद्धोऽमदोऽद्राक्षमिदंपश्यामीति
यदिहितयोर्भिन्नःकर्त्तास्यात् ततोहंस्मरामित्यद्राक्षीदन्यइतिप्रतीयात्॥ नतेनंप्रत्येतिकश्चित्॥ यत्रैवं
प्रत्ययःतत्रदर्शनस्मरणयोर्भिन्नमेवकर्त्तारंसर्वलोकोवगच्छति॥

व्यः॥ इदंपश्यामीतिस्थानांतरसंबंधकथनंयोहमद्राक्षंसोहंपश्यामीतिप्रत्यभिज्ञांतरद्योतनार्थं॥ विपक्षेबा
धकमाह॥ यदिहीति॥ दृष्टस्मर्त्रोर्भेदेऽहंस्मरामिअन्योऽद्राक्षीदितिप्रतीतिःस्यादियत्रदृष्टांतमाह॥ यत्रैवमिति॥

॥४८॥

प्रत्ययमाह॥ स्मरामीति॥ स्मरामित्वहमन्योद्राक्षीदितिप्रत्ययोयत्रतत्रभिन्नमेवकर्त्तारंलोकोऽवगच्छतीत्यविवादमित्यर्थः॥ प्रकृतप्र
त्यभिज्ञायांतादृशभेदप्रत्ययस्यबाधकत्वादर्शनादात्मस्थायितंदुर्वारमियाह॥ रहतहमदइति॥ यथाऽग्नेःऔष्ण्यादिकंनबा
धतेकश्चित्तथानाहमद्राक्षमितिपूर्वदर्शनेननिरुणद्धीत्यनेनबाधाभावात्प्रत्यभिज्ञाप्रमेयुक्तंभवति॥ तथादृष्टस्मर्त्रो

स्मरामित्वहमसावदोऽद्राक्षीदिति॥ रहतहमदोद्राक्षमितिदर्शनस्मरणयोर्वैनाशिकोप्यात्मानमेवैकंकर्त्तारं
मवगच्छति॥ ननाहमित्यात्मनोदर्शनंनिवर्त्तंनिरुणद्धि॥ यथाग्निरनुष्णोऽप्रकाशइतिना॥ तत्रैवंसतिकस्यदर्शन
स्मरणक्षणद्वयसंबंधेक्षणिकत्वाभ्युपगमतोनिरपहार्यावैनाशिकस्यस्यात्॥ तथानतरामनंतरामात्मन
एवप्रतिपत्तिंप्रत्यभिजानन्नेकंकर्त्तारंमोक्षमात्मुच्छासादनंतरंचाथप्रतिपत्तारंराजन्मनआत्मैककर्तृकाःप्र
तिसंदधानःकथंक्षणभंगवादीवैनाशिकोनापत्रपेत॥ सयदिब्रूयात्सादृश्यादेतत्संपत्स्यतइति॥ ॥

रैकेयसंतिस्थायितंपलितमाह॥ तत्रैवंसतीति॥ क्षणद्वयसंबंधेप्यात्मनस्तृतीयक्षणेभंगोस्तीतिवदंतंप्रत्याह॥
तथेति॥ वर्तमानदेशामारभ्योत्तमादुच्छ्वासादामरणादनंतरांस्वस्यैवप्रतिपत्तिमात्मैककर्तृकांप्रत्यभिजानन्नात्म
नश्चवर्तमानदेशापर्यंतंअतीताःप्रतिपत्तीःस्वकर्तृकाःप्रतिसंदधानःसन्नितियोजना॥ दीपज्वालासिवात्म
निप्रत्यभिज्ञानंसादृश्यदोषादितिशंकते॥ सदृशेति॥

साद्श्याज्ञानस्य धर्मिप्रतियोगिज्ञानाधीनत्वात्स्थिरस्य तालुरसतान्न सादृश्यज्ञानं संभवति॥ सत्येवाऽपसि
द्धांतः स्यादितिपरिहरति॥ तन्मिथ्यादिना॥ स्यादेतत्तेन सादृश्यप्रत्ययः पूर्वोत्तरवस्तुद्वयज्ञानजन्यस्तत्तद्वयसादृश्य
वगाही किंतर्हि कश्चिद्दोषविशेषः साकारमेव बाह्यं तेन विषयीकुर्वाणः क्षणांतरस्पर्शी॥ अतोन स्थिरदृष्टेपक्षेति चे
त्तंप्रतिब्रूयात्॥ तेनेदंसदृशमितिद्वयायत्तत्वात्सादृश्यस्यक्षणभंगवादिनः सदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेक
स्याभावात्सादृश्यनिमित्तंप्रतिसंधानमितिमिथ्याप्रलाप एव स्यात्॥ स्याच्चेत्पूर्वोत्तरयोः क्षणयोः
सादृश्यस्यग्रहीतैकस्तथासंश्चैकस्य क्षणद्वयानुस्थानात्क्षणिकत्वप्रतिज्ञापीड्येत॥ तेनेदंसदृशमितिप्र
त्ययांतरमेवेदंपूर्वोत्तरक्षणद्वयग्रहणनिमित्तमितिचेत्॥ न॥ तेनेदमितिभिन्नपदार्थोपादानात्॥
प्रत्ययांतरमेवचेत् सादृश्यविषयंस्यात्तेनेदंसदृशमितिवाक्यप्रयोगोऽनर्थकः स्यात्॥ सादृश्यमित्ये
वप्रयोगः प्राप्नुयात्॥

कृते॥ तेनेदमिति॥ अत्रवस्तुत्रयंसादृश्यप्रत्ययेतेनेदंसदृशमितिवस्तुत्रयंभासतेनवेतिनेतिवदतः स्वानुभव
विरोधः॥ किंचार्थभेदाभावात्पदत्रयप्रयोगोन स्यात्॥ तस्मात्पदत्रयेणमिथःसंसृष्टभिन्नार्थभानादभा
नमसिद्धमितिपरिहरति॥ मतेनेति

तदभिन्नाभिन्नस्यतदभेदात्

॥४९॥

अथभासतेवस्तुत्रयंतच्चप्रत्ययाभिन्नमेवनबाह्यमितिचेन्न॥ त्रयाणामेकप्रत्ययाभेदेपिथोप्यभेदायत्तेःरूपाप
रितुल्यमाणांवितानवादिनंप्रत्याह॥ यदाहीति॥ वस्तुत्रयंतेयंसादृश्यप्रत्ययाद्भिन्नंसर्वलोकप्रसिद्धंनचेन्नांगीक्रिय
ते॥ स्वायिदृष्टप्रसंगभयेनतर्हितत्तदाकाराणांक्षणिकत्वेनभिन्नानांमिथोवाच्यैनभिन्नंतदेकमिन्धर्मिणिवि

यदाहितेनैकप्रसिद्धःपदार्थःपरीक्षकैर्नपरिगृह्यतेतदास्वपक्षासिद्धिः परपक्षदोषाश्चोभ
यमप्युच्यमानंपरीक्षकाणामात्मनश्चयथार्थेतेननबुद्धिसंतानमारोहति॥ ॥ ॥

द्वानेकपक्षस्फुरणात्मकंवित्रतिपत्तिसंभवात्स्वपक्षसाधनादिव्यवहारोत्थुप्येते॥ अतोयथानुभ
वंज्ञानंतेयभेदोऽंगीकार्यः॥ तथाचतेनेदंसदृशमितिबाह्यार्थयोर्ज्ञानपूर्वकंसादृश्यंज्ञानंतआ
त्मनःस्थायितंदुर्वारमित्यर्थः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ननुसंवेदनं बाह्यार्थाः क्षणिकस्वलक्षणा निर्विकल्पकग्राह्याः सविकल्पाध्यवसेयास्तुस्थायित्वसादृश्यादयो बाह्याः कल्पिताःअवभासंते॥ अतोविप्रतिपत्त्यादिव्यवहारइतिबाह्यार्थवादमात्रंकथंनिरस्यति॥ एवमेवेति॥ यत्प्रमाणसिद्धंतदेववक्तव्यं॥ नहिक्षणिकत्वेकिंचित्प्रमाणमस्ति॥ नचेदानींघटइतिप्रत्ययंअवर्त्तमानकालासत्वे॥ घटस्यगोचरयद्वर्त्तमानक्षणमात्रसत्वरूपेक्षणिकत्वेमानमितिवाच्यं॥ तस्यवर्त्त

एवमेवैषोर्थइतिनिश्चितंयत्तदेववक्तव्यं॥ ततोन्यदुच्यमानंबद्धप्रलापितमात्मनः केवलंप्रख्यापयेत्॥

तस्यवर्त्तमानत्वमात्रगोचरत्वेनकालांतरासत्वासिद्धेः॥ नचयत्सत्तत्क्षणिकमितिव्याप्तिरस्ति॥ विद्युदादेरपिद्वित्रिक्षणस्थायित्वेनदृष्टत्वाभावात्॥ नचस्थायिनमनुमातारंतरेणानुमानंसंभवति॥ तस्मादनुमानसिद्धार्थवक्तातथागतोऽश्रद्धेयवचनइत्यर्थः॥

बुद्धः

DR. BHAU DAJI